

तेलंगाणप्रभुत्वप्रकाशनम्
हैदराबाद्

तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम्

Free

# संस्कृतकौमुदी

## सप्तमी कक्ष्या

## (प्राच्यपाठशालानाम्)

**7th Sanskrit Reader**

(Main Language)

तेलंगाणप्रभुत्वप्रकाशनम्
हैदराबाद्

तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम्

## పిల్లలూ! కింది అంశాలు చదవండి - సూచనల ప్రకారం చేయండి

- ప్రారంభంలో సన్నివేశచిత్రం ఉంది . ఆ చిత్రాన్ని చూసి వివిధ రకాలైన పండ్లను సంస్కృతంలో ఏమంటారో తెలుసుకోండి. ఉపాధ్యాయుని సహాయంతో చిత్రాన్ని గురించి మాట్లాడండి.
- సంసిద్ధతాపాఠాల్లో ఉన్న సంభాషణలను, గీతాలను ప్రతిరోజు అభ్యాసం చేయండి.
- ప్రతిపాఠంలో ముందుగా ఒక చిత్రం ఉంటుంది. ఆ చిత్రాన్ని చూడండి. దాని కింద ఉన్న ప్రశ్నలకు జవాబులను ఆలోచించి చెప్పండి.
- పాఠం చదవడానికి ముందు పాఠ్యాంశచిత్రాలను చూసి పాఠంలోని విషయాన్ని ఊహించండి. చిత్రాల ఆధారంగా సంభాషణలు చెప్పండి.
- ప్రతిరోజు పాఠాన్ని బిగ్గరగా చదవండి. మీ ఉపాధ్యాయుడు చదివేటప్పుడు జాగ్రత్తగా వినండి. మీకు తెలియని పదాలు/చదవలేకపోయిన పదాలను మీ ఉపాధ్యాయుడు ఎలా పలుకుతున్నాడో జాగ్రత్తగా వినండి. మీరు అలా చదవడానికి ప్రయత్నించండి.
- పాఠాన్ని చదివి అర్థం కాని పదాల కింద గీత గీయండి. వాటి అర్థాలను పుస్తకం చివర పదకోశంలో చూసి లేదా ఉపాధ్యాయుని అడిగి తెలుసుకోండి.
- మీ ఉపాధ్యాయుడు పాఠం చెప్పేటప్పుడు జాగ్రత్తగా వినండి, మీకు తెలియని పదాల గురించి / విషయం గురించి తప్పకుండా అడిగి తెలుసుకోండి.
- పాఠం తర్వాత ఇచ్చిన 'ఏతాని కుర్వంతు'లోని అభ్యాసాలను మీ ఉపాధ్యాయుని అడిగి తెలుసుకోండి.
- ఆ తర్వాత మీరే సొంతంగా రాయాలి.
- అభ్యాసాలలో ఇచ్చిన ప్రశ్నలకు జవాబులను గైడ్లలో గాని, ఇతరుల నోటుపుస్తకాలలో గాని చూసి రాయకూడదు. ఎందుకంటే దాని వల్ల మీకు సొంతంగా రాయడం రాకుండా పోతుంది.
- అభ్యాసాలలో ఇచ్చిన వ్యాకరణాంశాలు మీకు అర్థంకావడానికి మొదట ఉదాహరణలు ఇచ్చారు. వాటి ఆధారంగా అర్థం చేసుకొని చేయండి.
- స్వీయరచనా, సర్జనాత్మకవ్యక్తీకరణమ్, పరియోజనాకార్యమ్, ప్రశంసలకు సంబంధించిన అభ్యాసాల గురించి ముందుగా ఉపాధ్యాయుడు చర్చ నిర్వహిస్తాడు. మీరు ఆ చర్చలో పాల్గొనండి. తెలియని విషయాలను అడిగితెలుసుకోండి. తర్వాత మీరే సొంతంగా అభ్యాసాలను రాయండి. అవసరమైతే మీ తోటి వారితో కలిసి చేయండి.
- మీరు రాసిన జవాబులను తరగతిగదిలో చదివి వినిపించండి. చేసిన ప్రాజెక్టుపనులను ప్రదర్శించండి. మీ ఉపాధ్యాయుడు ఇచ్చిన సూచనల ప్రకారం సరిచేసుకోండి. సరిచేసుకున్న తర్వాతనే నోటు పుస్తకాలలో రాయండి.
- పాఠం చివర 'స్వీయమూల్యాంకనమ్' అనే పట్టిక ఉంది. ఈ పట్టికలోని ఒక్కొక్క వాక్యాన్ని చదవండి. చేయగల్గితే **ఔనని**, చేయలేకపోతే **కాదని** గుర్తించండి. మీరు చేయలేని వాటి గురించి మీ ఉపాధ్యాయుని అడిగి మళ్ళీ అభ్యాసం చేయండి.
- పుస్తకంలో 'పఠంతు-నందంతు' పేరుతో మీకోసం కథలు, గేయాలు, ఇచ్చారు. వీటిని మీరే సొంతంగా చదవండి, ఆనందించండి.
- పుస్తకంలో 'ఛాత్రైః సాధితవ్యాని సామర్థ్యాని' ఉన్న పేజిని చదవండి. దీనిలో ఉన్న సామర్థ్యాలనన్నింటినీ మీరు ఈ తరగతి పూర్తి అయ్యేసరికి చేయగలగాలి.
- పాఠశాలలో మీ స్నేహితులతో, ఉపాధ్యాయులతో సంస్కృతంలోనే మాట్లాడడానికి ప్రయత్నించండి.

## एतानि कुर्वन्तु

अधः दत्तानि चित्राणि पश्यन्तु।
पाठेषु एतादृशचित्राणि यत्र यत्र सन्ति तत्र तत्र दत्तानां सूचनानाम् अनुसारं क्रियाः कुर्वन्तु।

### शृण्वन्तु, विचिन्त्य वदन्तु



### पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



### लेखनं, स्वीयरचना



पठन्तु-लिखन्तु



चिन्तयन्तु -लिखन्तु

### पदजालाभिवृद्धिः, भाषाक्रीडाः



### व्याकरणांशाः



### सर्जनात्मकव्यक्तीकरणम्



### परियोजनाकार्यम्



### प्रशंसा





### स्वीयमूल्याङ्कनम्



SCERT TELANGANA

# संस्कृतकौमुदी

## सप्तमी कक्ष्या

## (प्राच्यपाठशालानाम्)


**प्रधानसम्पादकः**

**आचार्य विरिवेण्टि मुरलीधरशर्मा**

शिक्षाविभागः

राष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

तिरुपतिः

**सम्पादकः**

**ए.गिरिहरनाथबाबु**

सहाध्यापकः (संस्कृतम्)

प्रभुत्वोन्नतपाठशाला

वेङ्गलरावुनगर्, हैदराबाद्.

**संयोजिका**

**श्रीमती के.आर्.टि.एल्.ज्योतिर्मयी**

उपन्यासिका

राज्यविद्यापरिशोधनशिक्षणसंस्था

हैदराबाद्.


**पाठ्यपुस्तकविकासमुद्रापकसमितिः**


**प्रधाननिर्वहणाधिकारिणी**

**श्रीमती बि.शेषुकुमारी**

सञ्चालिका

राज्यविद्यापरिशोधनशिक्षणसंस्था,

हैदराबाद्.

**निर्वाहकः**

**डा॥ नन्नूरु उपेन्दर् रेड्डि**

आचार्यः, विद्याप्रणालिकापाठ्यपुस्तकविभागः

राज्यविद्यापरिशोधनशिक्षणसंस्था,

हैदराबाद्.

**प्रधानव्यवहारनिर्वाहकः**

**श्री बि.सुधाकरः**

सञ्चालकः

प्रभुत्वपाठ्यपुस्तकमुद्रणालयः,

हैदराबाद्.



**तेलंगाणप्रभुत्वप्रकाशनम्**


*सत्यमेव जयते*

*विद्या ददाति विनयम्*

*धर्मो रक्षति रक्षितः*

*कृषितो नास्ति दुर्भिक्षम्*

SCERT TELANGANA



तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम् 2018-19

© Government of Telangana, Hyderabad

*First Published 2012*
*New Impressions 2013, 2014, 2015, 2016, 2017, 2018*

**All rights reserved**

No part of this publication may be reproduced, stored in a retrieval system, or transmitted, in any form or by any means without the prior permission in writing of the publisher, nor be otherwise circulated in any form of binding or cover other than that in which it is published and without a similar condition including this condition being imposed on the subsequent purchaser.

The copy right holder of this book is the Director of School Education, Hyderabad, Telangana.

This Book has been printed on 70 G.S.M. SS Maplitho
Title Page 200 G.S.M. White Art Card

**तेलंगाणप्रभुत्वस्य निःशुल्कवितरणम् 2018-19**

*Printed in India*
at the Telangana Govt.Text Book Press,
Mint Compound, Hyderabad,
Telangana.

SCERT TELANGANA

# पुरोवाक्

संस्कृतं भारतीयानां सांस्कृतिकभाषा। अस्माकं प्राचीनर्षीणाम् अपारज्ञानसम्पत्, अपूर्वजीवनानुभवाः क्रान्तिदर्शनञ्च संस्कृतभाषया अभिव्यक्तीकृतम्। संहिताः, उपनिषदः, स्मृतयः, पुराणानि, इतिहासाः, काव्यानि इत्यादिभिः साहित्यस्य विविधरूपैः तेषां महती ज्ञानसम्पत् परम्परागतसंस्कृतिश्च संस्कृतभाषायां सुरक्षिता अस्ति। न केवलं वैदिकाचारसंहितापरं भौतिक-रसायन-गणित-खगोलादिशास्त्रीयविषयाः, व्यक्तेः शीलनिर्माणाय अपेक्षितानि आदर्शजीवनसूत्राणि च संस्कृते महर्षिभिः निक्षिप्तानि। अतः भारतीयायाः सनातनसंस्कृतेः परिरक्षणाय, परिपोषणाय अनुसरणाय च संस्कृतभाषाध्ययनम् अतितराम् आवश्यकम्।

द्रविडभाषाः परित्यज्य सर्वा अपि भारतीयभाषाः संस्कृतादुत्पन्नाः। द्रविडभाषाः अपि संस्कृतेन नितरां प्रभाविताः। बहुभाषाधिगमावसरे संस्कृतभाषा छात्राणाम् अत्यन्तोपकारिणी भवितुमर्हति। अतः भारतीयायां बहुभाषिकतायां संस्कृतभाषायाः स्थानम् अविभाज्यम् अनिवार्यञ्च।

संस्कृताध्ययनेन न केवलम् अन्यभाषाज्ञानं, प्रत्युत गणित-विज्ञान-समाजशास्त्रादिशास्त्रेषु परिनिष्ठितपदानाञ्च अवगमनं सुशकं भवति।

पाठ्यचर्यायां प्रथमभाषया सह संस्कृतस्यापि स्थानं कल्पितं प्राच्यपाठशालासु। 1985 तमवर्षस्य अनन्तरम् अचिरे काले अर्थात् 2009 तमे वर्षे षष्ठकक्ष्यायाः नूतनं संस्कृतपुस्तकं समारचितम्। एतन्मध्ये N C F 2005, R T E 2009, तेलंगाणराज्यस्य विद्याप्रणालिकापत्रम् (2011) इत्येतान् आधृत्य भाषाधिगमस्य मौलिकसूत्राणि समारचितानि। तानि विमृश्य विद्यालयस्तरीया पाठ्यचर्या पुनारचिता। इत्थं नूत्नतया संरचितां पाठ्यचर्यामनुसृत्य ऐषमः प्राच्यपाठशालाधारायां षष्ठ-सप्तमकक्ष्ययोः नूतनसंस्कृतपाठ्यपुस्तके संरचिते। एषु पाठ्यपुस्तकेषु कथाः, सम्भाषणानि, गीतानि, श्लोकाः, निबन्धाः इत्यादिषु दैनन्दिनजीवने प्रयुज्यमानासु भाषाप्रक्रियासु पाठाः रचिताः। पञ्चवर्णरञ्जितमिदं पाठ्यपुस्तकं छात्रेषु संस्कृताध्ययनविषये अभिनवमुत्साहं परिपूरयिष्यतीति निश्चप्रचम्। श्रवण-भाषण-पठन-लेखन-कौशलानां विकासार्थं समुचिताः अभ्यासाः पुस्तकेऽस्मिन् प्रकल्पिताः। तथैव सर्जनात्मकपरियोजनादिकार्याणां विभिन्नाभ्यासाः समारचिताः। प्रत्येकमपि पाठस्यान्ते स्वार्जितज्ञानकौशलादीनां मूल्याङ्कनार्थं समुचितं स्थानं समुपकल्पितमत्र।

संस्कृतभाषाध्ययने अध्यापकानां दायित्वम् इतरभाषाध्यापकानां दायित्वमतिशेते। छात्राः संस्कृतकक्ष्यायामेव संस्कृतं शृण्वन्ति, नान्यत्र। अतस्तेषु संस्कृतसम्भाषणकौशलविकासः सुदुष्करः। अतो हेतोः अध्यापकाः स्वच्छात्रेषु संस्कृतसम्भाषणकौशलविकासार्थं सर्वविधप्रयत्नान् कुर्युः। एतत् मनसिकृत्य पुस्तकेऽस्मिन् सरलसम्भाषणार्थं संसिद्धतापाठाः गीतानि च स्थापितानि।

पाठ्यपुस्तकस्यास्य रूपकल्पने उपकृतवद्भ्यः सम्पादकेभ्यः, अध्यापकेभ्यः, विषयनिपुणेभ्यः, चित्रकारेभ्यः, उट्टङ्केभ्यः संस्थेयं हार्दान् धन्यवादान् व्याहरति। पुस्तकेऽस्मिन् उत्तमकथागीतादीनां सन्निवेशनार्थम् अनुमतिं प्रदाय उपकृतवत्यै संस्कृतभारत्यै विशेषकार्तज्ञ्यम् आविष्करोति।

पाठ्यचर्यायाः रूपकल्पने सहकृतवते देहलीविश्वविद्यालयस्य आचार्यस्य डा. रमाकान्त-अग्निहोत्रिमहोदयाय परामर्शकेभ्यश्च धन्यवादाः। पाठ्यपुस्तकमिदं भाव्यध्ययनाय आवश्यकनैपुण्यं विकासयितुम् उपकरिष्यतीति दृढं विश्वसिमि।

इति

**श्रीमती बि.शेषुकुमारी**
सञ्चालिका
राज्यविद्यापरिशोधनशिक्षणसंस्था, हैदराबाद्

SCERT TELANGANA

# अध्यापकेभ्यः सूचनाः

- पुस्तकेऽस्मिन् छात्रैः साधितव्यानां सामर्थ्यानां सूचिका संयोजिता । तानि सामर्थ्यानि छात्रैः साधितव्यानि इत्यस्मिन् विषये अध्यापकैः दायित्वं स्वीकरणीयम् ।
- प्रथमभागे संसिद्धतापाठाः सन्ति । तेषां साहाय्येन छात्राः मौखिकसम्भाषणानि कुर्युः। तत्र अध्यापकानां दायित्वमधिकमस्ति ।
- प्रत्येकस्मिन् पाठान्ते अभ्यासाः सन्ति । पाठ्यांशबोधनेन साकम् अभ्यासाः विधिना छात्रैः कारयितव्याः। यतः तत्रस्थसामर्थ्यानि तैः साधनीयानि ।
- प्रत्येकं पाठस्यारम्भे उन्मुखीकरणचित्रं/सन्दर्भचित्रम् अस्ति । तत् चित्रमुद्दिश्य छात्रैः सम्भाषणं कारयितव्यम् । दत्तान् प्रश्नान् अतिरिच्य अन्यप्रश्नाः प्रष्टव्याः । तथा उन्मुखीकरणं कृत्वा पाठः पाठनीयः।
- वैयक्तिकरूपेण धारया च छात्रैः पाठ्यांशवाचनं कारयितव्यम् । अध्यापकाः योग्योच्चारणेन पाठं पठित्वा छात्रेषु स्पष्टोच्चारणस्य कल्पनां दद्युः।
- पाठनात् पूर्वमेव श्लोक-गीतादीन् छात्रान् श्रावयन्तु । तेषाम् उच्चारणं गीतालापनं च छात्रैः कारयन्तु ।
- सम्भाषणरूपान् पाठान् साभिनयं पाठयन्तु। तत्र वैयक्तिकनिरीक्षणमावश्यकं भवेत् ।
- व्याकरणम् अनुप्रयुक्तरूपेणैव पाठयितव्यम् । तथा विधिना अभ्यासाः कारयितव्याः ।
- कक्ष्यायां ८०% छात्रैः निर्दिष्टसामर्थ्यप्राप्तेः अनन्तरम् अन्यपाठः पाठनीयः। प्रतिमासं विभाजितकालांशेषु प्रणाल्यनुगुणं बोधनाभ्यासप्रक्रिये निवेदनीये ।
- सामर्थ्यानुगुणाभ्यासानां पाठनार्थं तेषां निर्वहणविधानम् अत्र दीयते ।

  **शृण्वन्तु, विचिन्त्य वदन्तु** - सम्पूर्णकक्ष्यायाः कृत्यनिर्वहणम् ।

  **पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु** - गणरूपेण वा वैयक्तिकरूपेण वा कृत्यनिर्वहणम् ।

  **पदजालाभिवृद्धिः, भाषाक्रीडाः** - एतत् गणकृत्यम् । अत्र वैयक्तिकरूपेण निरीक्षणं करणीयम् ।

  **व्याकरणांशाः** - पूर्णकक्ष्यायै कृत्यं निर्वोढव्यम्। अनन्तरं वैयक्तिकरूपेण निरीक्षणमावश्यकम्।

  **स्वीयरचना, सर्जनात्मकव्यक्तीकरणम्, परियोजनाकार्यम्, प्रशंसा** इत्येतानि सामर्थ्यानि उद्दिश्य लेखनार्थं सम्पूर्णकक्ष्यायां सूचनाः देयाः । तदनन्तरं छात्रैः तत्रस्थाः अभ्यासाः कारयितव्याः । छात्रैः लेखनानन्तरं चर्चापद्धत्या समीकुर्यात् । तदनन्तरं स्वीयपुस्तिकासु लेखितुं समादिशेत् ।

  **स्वीयमूल्याङ्कनम्** - तत्रत्यान् अंशान् आधारीकृत्य स्वयं छात्राः मूल्याङ्कनं कुर्युः। तदर्थं ते अध्यापकैः प्रोत्साहनीयाः।

- पाठ्यांशबोधनसमये अधः दत्तानि सोपानानि अनुसरणीयानि ।

  I. **उपोद्घातः** - स्वागतभाषणम्, उन्मुखीकरणम्, शीर्षिकाप्रकटनम्, नेपथ्यम् ।

  II. **पाठ्यांशबोधने / सामर्थ्येषु अवगमनम्** - चित्राण्युद्दिश्य भाषणम्, अध्यापकस्य आदर्शपठनम्, छात्राणां बाह्यपठनम्, छात्रैः अर्थसङ्ग्रहणम्, पाठितविषये चर्चा, अवगमनम्।

III. **अवगमनपरिशीलनम्** - पाठितविषयेषु छात्रावगमनपरिशीलनम् ।

IV. **गृहकार्यम्** - (परियोजनाकार्य-प्रशंसा-बोधितविषयाणां सम्बद्धं गृहकार्यम्)

- प्रत्येकमपि पाठेन साधितव्यानां सामर्थ्यानां साधनाय प्रणाली संरचनीया । संस्कृते पाठ्यप्रणाली अधो दत्तप्रकारेण निर्मातव्या ।

१. पाठस्य नाम -

२. पाठं बोधयितुम् आवश्यककालांशाः -

३. साधितव्यानि सामर्थ्यानि -

४. कालांशानुसारं विभागः -

| कालांश-सङ्ख्या | बोधनांशः | बोधनव्यूहाः | सामग्री संसाधनानि | छात्रेभ्यः दीयमानः अभ्यासः, गृहकार्यञ्च |
|---|---|---|---|---|
| | | | | |

५. पाठ्यबोधनार्थम् आवश्यकतातिरिक्तसमाचारसङ्ग्रहणम् (अध्यापककृत्यम्)।

६. पाठ्यबोधनानन्तरम् अध्यापकस्य प्रतिस्पन्दनानि (अनुभवाः, अनुभूतयश्च) ।

- एवम् ‘एतानि कुर्वन्तु’ इति शीर्षिकागतांशेषु एकैकं कतिभिः छात्रैः कृतमिति परिशीलयेत् । आवश्यकतानुसारं प्रत्याम्नायबोधनं निर्वोढव्यम् ।
- सामर्थ्यसाधनार्थं कदापि मार्गदर्शिकाम् (Guide), अध्ययनसामग्रीं (Study material) दृष्ट्वा अभ्यासानां लेखनं न कारयेत् । छात्रैः यद्येवं दृष्ट्वा लिख्यते तर्हि अङ्काः न प्रदीयन्तेति वदेत् । स्वीयबुद्ध्या लिखितांशानेव परिशीलयेत् ।
- निरन्तरसमग्रमूल्याङ्कनविध्यनुसारं छात्रप्रगतिं प्रतिदिनं निर्धारितसामर्थ्यानां प्रकारेण पञ्जीकुर्यात् । एतदर्थं प्रत्येकपञ्जीकरणपुस्तिका स्थापनीया ।
- निरन्तरसमग्रमूल्याङ्कनविधानेन जूलै, आगस्ट्, नवम्बर्, फिब्रवरीमासेषु आयोज्यमाननिर्माणात्मक-मूल्याङ्कनेषु छात्राणां भागग्रहणपरिशीलनं (१०अङ्काः), लिखितविषयाः (१०अङ्काः), कृतपरियोजनाकार्याणि (१० अङ्काः), लघुपरीक्षा (२० अङ्काः) चेति चतुर्भिः अंशैः छात्रप्रगतिं निधार्य छात्रप्रगतिसूचकपुस्तिकासु पञ्जीकरणं कुर्यात् । एतदर्थं प्रत्येकच्छात्रप्रगतिपञ्जीकरणपुस्तिका समुपस्थापनीया ।
- सेप्टेम्बर्/अक्टोम्बर्, डिसेम्बर्/जनवरी, एप्रिल्मासेषु आयोज्यमानसङ्ग्रहणात्मकमूल्याङ्कनार्थम् अध्यापकैरेव स्वयं सामर्थ्याधारितप्रश्नपत्रं निर्मातव्यम् ।
- सरलसूक्तिभिः, हितोक्तिभिः कक्ष्यायां पाठशालायां च संस्कृतवातावरणं स्रष्टुं प्रयत्नः करणीयः।
- न केवलं कक्ष्यायाम् प्रत्युत बाह्यपरिसरेऽपि लघुसंस्कृतपदैः सम्भाषणं कर्तुं छात्राः प्रोत्साहनीयाः।



तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम् 2018-19

SCERT TELANGANA

# वन्दे मातरम्

- बङ्किञ्चन्द्र छटर्जी

वन्दे मातरं, वन्देमातरम्
सुजलां सुफलां मलयजशीतलाम्
सस्यश्यामलां मातरं वन्दे मातरम्
शुभ्रज्योत्स्नापुलकितयामिनीम्
फुल्लकुसुमितद्रुमदलशोभिनीम्
सुहासिनीं सुमधुरभाषिणीम्
सुखदां वरदां मातरं वन्दे मातरम्।

# पठत संस्कृतम्

- श्री मञ्जुनाथशर्मा

पठत संस्कृतं, वदत संस्कृतम्
लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि ।। पठत।।

ज्ञानवैभवं वेदवाङ्मयम्
लसति भवभयापहारि यत्र मुनिभिरार्जितम्
कीर्तिरार्जिता यस्य प्रणयनात्
व्यास-भास-कालिदास-बाण मुख्यकविभिः ।। पठत।।

स्थानमूर्जितं यस्य मन्वते
वाग्विचिन्तका हि वाक्षु यस्य वीक्ष्य मधुरताम्
यद्विना जना नैव जानते
भारतीयसंस्कृतिं सनातनाभिधां वराम्।। ।। पठत।।

जयतु संस्कृतं संस्कृतिस्तथा
संस्कृतस्य संस्कृतेश्च प्रणयनाच्च मनुकुलम्
जयतु संस्कृतं, जयतु मनुकुलम्
जयतु जयतु संस्कृतं, जयतु जयतु मनुकुलम्।। ।। पठत।।



SCERT TELANGANA

# राष्ट्रियगीतम्

**- रवीन्द्रनाथ् ठागूर्**

जनगणमन अधिनायक जय हे!
भारतभाग्यविधाता!
पञ्जाब सिन्धु गुजरात मराठा,
द्राविड उत्कल वङ्गा!
विन्ध्य हिमाचल यमुना गङ्गा,
उच्चलजलधितरङ्गा!
तव शुभ नामे जागे!
तव शुभ आशिष मागे!
गाहे तव जय गाथा!
जनगणमङ्गलदायक जय हे
भारतभाग्यविधाता!
जय हे! जय हे! जय हे!
जय जय जय जय हे!

# प्रतिज्ञा

**- पैडिमर्रि वेंकट सुब्बाराव**

भारतदेशः मम मातृभूमिः। भारतीयास्सर्वे मम सहोदराः।

अहं मम देशं प्रीणामि। सुसम्पन्ना, बहुविधा भारतीया सांस्कृतिकसम्पत् मम गर्वकारणम्। तस्याः योग्यजनो भवितुं सर्वदा अहं परिश्रमं करोमि।

मम मातापितरौ, उपाध्यायान्, ज्यैष्ठान् सर्वान् च पूजयामि। सर्वैः सह सगौरवं व्यवहरामि।

मम देशस्य विषये, प्रजानां विषये सेवानिरतिं भजामि। जन्तूनां विषये दयालुः भवामि इति च प्रतिज्ञां करोमि।

सर्वेषां श्रेयोऽभिवृद्धयः एव मम आनन्दस्य कारणम्।

SCERT TELANGANA


तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम् 2018-19

## रचयितारः

**श्रीमती के.आर्.टि.एल्.ज्योतिर्मयी,**
उपन्यासिका,
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्.

**डा. वि.सुब्रह्मण्यम्,**
उपसञ्चालकः,
संस्कृत अकाडमी,
उस्मानिया विश्वविद्यालयः, हैदराबाद्.

**ए. गिरिहरनाथबाबु,**
सहाध्यापकः (संस्कृतम्)
प्रभुत्वोन्नतपाठशाला,
वेङ्गलरावुनगर्, हैदराबाद्.

**श्रीमती मादिराजु विजयलक्ष्मीः,**
विश्रान्तसंस्कृताध्यापिका,
श्रीमलयालस्वामिसंस्कृतपाठशाला,
कोवेलकुण्ट्ल, कर्नूल् जिल्ला.

**डा. धूलिपाल रामकृष्णः,**
संस्कृतविभागाध्यक्षः,
मारिस् स्टेल्ला कलाशाला,
विजयवाडा, कृष्णा जिल्ला.

**डा. वै.नागेन्द्रम्मा,**
संस्कृताध्यापिका,
श्रीरामकृष्णसंस्कृतपाठशाला,
श्रीकृष्णगीताश्रमम्, प्रोद्दुटूरु, कडप जिल्ला.

**श्रीमती वै.दामोदरम्मा,**
संस्कृताध्यापिका,
चौडेश्वरीदेवीप्राच्यपाठशाला,
कडप.

**तुर्लपाटि शिवरामकृष्णः,**
संस्कृताध्यापकः,
दिल्ली पब्लिक् स्कूल्,
नाचारम्, हैदराबाद्.

**डि.रवीन्द्रः,**
संस्कृताध्यापकः,
भवगद्गीताविद्यालयः,
वरङ्गल्.

**पि. गोपालकृष्णः,**
संयुक्तकार्यदर्शी
संस्कृतभारती,
हैदराबाद्.

## परामर्शकमण्डली

**कोडेम्पूडि अप्पाराव्,**
संस्कृतोपन्यासकः,
श्री शारदा सन् फ्लवर् जूनियर् कलाशाला,
चल्लपल्लि, कृष्णा जिल्ला.

**डा॥ दोर्बल प्रभाकरशर्मा,**
विश्रान्तप्राचार्यः,
संस्कृतकलाशाला,
कोव्वूरु, पश्चिमगोदावरी जिल्ला.

**श्रीमती एन्.सरोजनी देवी,**
उपन्यासिका,
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्.

**सुवर्ण विनायकः,**
संयोजकः,
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्.

## चित्रकाराः

**कूरेल्ल श्रीनिवास्,** सहाध्यापकः (तेलुगु), जिल्लापरिषदः उन्नतपाठशाला, पोचम्पल्लि, नल्गोण्डजिल्ला.

**सय्यद् हस्मतुल्ला,** चित्रलेखनाध्यापकः, प्रभुत्वोन्नतपाठशाला, खाजीपेट्, वरङ्गल्जिल्ला.

**श्रीमती के. पार्वती,** चित्रलेखनाध्यापिका, हिन्दूकालेज् उन्नतपाठशाला, गुंटूरु.

**कूरेल्ल राघवाचारि,** चित्रलेखनाध्यापकः, जिल्लापरिषदः उन्नतपाठशाला, नकरेकल्, नल्गोण्डजिल्ला.

**बीर श्रीनिवास्,** प्राथमिकाध्यापकः, मण्डलपरिषत् प्राथमिकपाठशाला, वेलूरु, खम्मंजिल्ला.

**सिहेच् वेंकटरमण,** प्राथमिकाध्यापकः, प्राथमिकपाठशाला, वीरनायकथण्डा, नल्गोण्डजिल्ला.

**जे.वेङ्कट स्वामी,** प्रभुत्वोपाध्यायशिक्षणकलाशाला, महबूबनगर्.

**के.बाबु,** प्रधानाध्यापक :, जिल्लापरिषदः उन्नतपाठशाला, वज्जपल्लि, निजामाबाद् जिल्ला.

## उट्टङ्ककः

**भुवनगिरि वेङ्कटलक्ष्मीनारायणः,** शोधच्छात्रः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः.

SCERT TELANGANA

# विषयसूची


| पाठस्य नाम | प्रक्रिया | मासः | पृष्ठसङ्ख्या |
|---|---|---|---|
| **प्रथमभागः** | | | |
| संसिद्धतापाठाः | | जून्, जुलै | 1-10 |
| १. विद्यास्वाम्यम् | (गीतम्) | जुलै | 11-18 |
| २. पञ्चशी पञ्चमी पञ्च नशी नमी | (कथा) | जुलै | 19-26 |
| **द्वितीयभागः** | | | |
| ३. अरण्यम् | (श्लोकाः) | अगष्ट् | 27-36 |
| ४. साहसम् | (वास्तविकघटना) | अगष्ट् | 37-44 |
| ५. कार्यदक्षता | (श्लोकाः) | सेप्टेम्बर् | 45-54 |
| ६. तुलसीवृक्षकम् | (निबन्धः) | सेप्टेम्बर् | 55-63 |
| ❀ चिन्तनस्य विषयः तु... | (कथा) | - | 64 |
| **तृतीयभागः** | | | |
| ७. लोकसेवनम् | (गीतम्) | अक्टोबर् | 65-74 |
| ८. नाडीजङ्घः | (कथा) | नवम्बर् | 75-84 |
| ९. भगवद्गीता | (श्लोकाः) | नवम्बर् | 85-92 |
| १०. जलसंरक्षणम् | (निबन्धः) | डिसेम्बर् | 93-100 |
| ❀ चोराय उपाहारः | (कथा) | - | 101-102 |
| **चतुर्थभागः** | | | |
| ११. धर्मबुद्धिः - पापबुद्धिः | (कथा) | जनवरी | 103-112 |
| १२. प्रहेलिकाः | (प्रहेलिकाः) | फिब्रवरी | 113-122 |
| १३. वनेचरः | (निबन्धः) | फिब्रवरी | 123-132 |
| १४. सुभाषितानि | (श्लोकाः) | - | 133-141 |
| ❀ करणीया दीनानां सेवा | (कथा) | - | 142 |
| **पुनश्चरणम्** | | मार्चि-एप्रियल् | |
| **अनुबन्धः** | | | |
| शब्दाः | | | 143-146 |
| धातवः | | | 147-149 |
| पदकोशः | | | 150-156 |
| क्रियापदकोशः | | | 157-158 |


☞ अध्यापकः 'सुभाषितानि' इति पाठे विद्यमानेषु श्लोकेषु प्रतिमासम् एकैकं श्लोकं छात्रैः अभ्यासयेत्।

❀ इत्यनेन चिह्नेन चिह्निताः अंशाः मूल्याङ्कनाय नोपयोक्तव्याः।

SCERT TELANGANA

# अनेन पाठ्यपुस्तकेन छात्रैः साधितव्यानि सामर्थ्यानि

- संस्कृतध्वनीनाम् उच्चारणकौशलसम्पादनं तथा उच्चारणदोषाणाम् अवगमनम्।
- संस्कृते दीयमानसूचनानां, मार्गदर्शकानां, प्रश्नानां च अवगमनसामर्थ्यं सम्पादनीयम्।
- कथा, गीतं, निबन्धः, नाटकं, सुभाषितश्लोकाः इत्यादीन् श्रुत्वा ''श्रूयमाणविषयः एषः'' इति स्थूलरूपेण अभिव्यक्तीकरणसामर्थ्यं सम्पादनीयम्।
- छात्राः पाठस्थपात्राणां मनोभावान्, तेषु अन्तर्वर्तितभेदान् ज्ञातुं समर्थाः भवेयुः।
- छात्राः सरलगद्यांशानां, पद्यानां, कथानां श्रवणमात्रेण भावम् अवगच्छेयुः।
- सरलप्रश्नाः संस्कृतेन प्रष्टव्याः।
- ज्ञाताः-श्रुताः-दृष्टाश्च पठितांशाः क्रमरूपेण वक्तव्याः। तेषां प्रकटीकरणसामर्थ्यं च सम्पादनीयम्।
- संस्कृतसम्भाषणानां प्रदर्शनसामर्थ्यं सम्पादनीयम्।
- सरलवाक्यैः सम्भाषणसामर्थ्यं विकसनीयम्।
- नूतनपदानां सन्दर्भानुसारम् अवगमनसामर्थ्यं भावग्रहणसामर्थ्यं च।
- पदकोशं दृष्ट्वा स्वयम् अर्थानाम् अवगमनसामर्थ्यम्।
- पाठ्यांशैः सह चित्राणां तोलनसामर्थ्यं विश्लेषणसामर्थ्यं च।
- भावानुगुणं श्लोकपठनसामर्थ्यम् अर्थावगमनसामर्थ्यं च।
- संस्कृतवाक्यरचनाशैल्याः, मातृभाषावाक्यारचनाशैल्याः च तोलनसामर्थ्यम्।
- संस्कृत-मातृभाषयोः पदानां मध्ये अर्थभेदावगमनम्,सारूप्ययोः अवगमनपूर्वकं तोलनसामर्थ्यम्।
- संस्कृत-मातृभाषयोः सम्बद्धप्रक्रियाणां तोलनावगनसामर्थ्ये।
- दृष्ट-श्रुत-पठितांशान् अनुसृत्य प्रश्नानां समाधानलेखनसामर्थ्यम्।
- चित्राधारेण सरलसंस्कृतवाक्यरचनासामर्थ्यम्।
- वचनानुसारं सञ्ज्ञाक्रियापदानां परिवर्तनसामर्थ्यम्।
- सरलसंस्कृतांशानां मातृभाषया अनुवादकरणसामर्थ्यम्।
- सङ्घटनानुसारं क्रमरूपेण व्यस्तवाक्यानां लेखनसामर्थ्यम्।
- पुरुषत्रये कालत्रये च वचनद्वयमुपयुज्य सरलवाक्यरचनासामर्थ्यम्।
- सन्धिपदानां विघटनसंयोजनसामर्थ्यम्।
- कालानुसारं लकारचतुष्टये क्रियापदप्रयोगसामर्थ्यम्।
- समानार्थकानां, विलोमशब्दानां ज्ञानम्।
- रागभावसहितं गीतानां, श्लोकानाम् गानसामर्थ्यम्।
- स्वीयपरिस्थितेः स्वीयपरिचयस्य च लेखनसामर्थ्यम्।
- दैनन्दिनीलेखनसामर्थ्यम्।
- वस्तूनां प्रतिरूपाणां सज्जीकरणसामर्थ्यम्, तेषां प्रदर्शनसामर्थ्यम्।
- मातृभाषासम्बद्धानां तथा इतरभाषासम्बद्धानां गीतानां कृत्यानां च सङ्कलनावगमनसामर्थ्यम्।
- संस्कृते तथा इतरभाषासु वचनभेदज्ञानावगमनम्।
- पदच्छेद-पदयोजनाभ्याम् उच्चारणे तथा लिप्यां सम्भूयमानानां परिणामानाम् अवगमनं तथा सूत्रीकरणसामर्थ्यञ्च ।

SCERT TELANGANA

प्रथमभागः

# संसिद्धतापाठाः

## १. गीतम्

## एहि एहि चन्दिर!



एहि एहि चन्दिर!
श्वेतकिरण! सुन्दर!
नीलगगनमन्दिर!
सकलजनमनोहर!

तारकेश! गिरिगुहासु
किरणजालमातनु।
वितर सस्यतरुलतासु
रसविशेषमादरात्॥

मातरः प्रदर्शनेन
नन्दयन्ति बालकान्।
पक्षिणश्च तव करेण
तोषयन्ति शावकान्॥

- गु गणपय्यहोळ्ळः

SCERT TELANGANA

छात्रैः सम्भाषणं कारयितव्यम्।

एतत् किम्? अत्र कानि फलानि सन्ति?
चित्रे पीतवर्णफलानि कानि कानि सन्ति?
उत्पीठिकायाः उपरि का अस्ति ? सा किं करोति?
महिला बालिका च कानि फलानि पश्यतः?
चित्रे हरितवर्णफलानि कानि सन्ति?




पनसफलम्
अनानसफलम्
महावकुलम् (सपोटा)
जलोर्वारुकम्

## सम्भाषणाभ्यासः - १

### संस्कृतसम्मेलनम् (क्रियापदानि)

आचार्यः - हे छात्राः! समीपकाले संस्कृतसम्मेलनं भविष्यति। तत्र वयं कार्यक्रमान् कुर्मः वा?

छात्राः - तत्र वयं किं किं कुर्मः?

आचार्यः - भवन्तः नाटकानि नृत्यानि च कुर्वन्तु।

अखिलेशः - वयं "गुरुदक्षिणा" इति नाटकं कुर्मः। अहं सर्वान् छात्रान् पाठयामि।

प्रमोदः - आचार्य! वयं सङ्गीत-कार्यक्रमं करिष्यामः।

आचार्यः - सङ्गीतकार्यक्रमे संस्कृतगीतानि एव गायन्ति खलु।

प्रमोदः - आम् ! श्रीमन्! अवश्यं संस्कृतगीतानि एव गायामः। वाद्यानि स्वयमेव वादयामः।

प्रकाशः - श्रीमन्! वयं वैदिकप्रार्थनां कुर्मः।

प्रदीपः - महाशय! संस्कृतसम्मेलने प्रदर्शिनीम् आयोजयामः किम्?

आचार्यः - आम्, अवश्यम् आयोजयामः प्रदर्शिनीम्। मम समीपे प्रदर्शिन्याः पत्राणि सन्ति। तानि स्वीकरोतु भवान्।

प्रदीपः - तथैव। तानि पत्राणि तत्र सुन्दरतया स्थापयामः।

आचार्यः - सम्मेलने संस्कृते स्पर्धाः भवन्ति। ताः सर्वाः स्पर्धाः परिशील्य स्वसामर्थ्यानुसारम् एकैकः एकां स्पर्धां चिनोतु। कश्चन भाषणस्पर्धां, कश्चन निबन्धलेखनस्पर्धां, कश्चन श्लोकस्पर्धां, अन्यः कश्चन गीतस्पर्धां च चिनोतु।

अरुणः - तथैव आचार्य! अहं श्लोकान् पठामि। एषः भाषणं करोति। सः निबन्धं लिखति। सा गीतं गायति। एवमेव खलु महोदय!

आचार्य - भवान् सम्यक् उक्तवान्। एवमेव सर्वे कुर्वन्तु।

छात्राः - श्रीमन्! भवतः वचनानि पालयामः।

आचार्यः - भवन्तः सर्वे अनुशासनं पालयन्ति इति अहं जानामि। पुनः परश्वः मिलामः।

SCERT TELANGANA

## सम्भाषणाभ्यासः - २

### प्रवासः (भूतकालः)

अरविन्दः - अमरेश! भवान् गतग्रीष्मकालस्य विरामदिनेषु कुत्र कुत्र गतवान्? किं किं दृष्टवान्?

अमरेशः - अहं देहलीम् अगच्छम्। तत्र राष्ट्रपतिभवनम् अपश्यम्। संसद्भवनं प्रधानमन्त्रिकार्यालयं च दृष्टवान्।

अरविन्दः - एवं वा! अहं तु पितामहस्य ग्रामं गतवान्।

अमरेशः - तथा वा! भवान् तत्र किं किं कृतवान्।

अरविन्दः - अहं मम पितामहस्य कृषिक्षेत्रं दृष्टवान्। तत्र सस्यानि जलेन सिञ्चितवान्। वृक्षान् आरूढवान्। फलानि खादितवान्। नारिकेलजलं पीतवान्। बालकैः सह क्रीडितवान्। जलाशये स्नानं च कृतवान्।

अमरेशः - एवं किल! भवान् बहुविधकार्याणि कृतवान्।

अरविन्दः - सत्यमेव। ग्रामजीवनम् आनन्ददायकम् इति मम पिता उक्तवान्। तत्र ग्रामीणानां स्वच्छं मनः सर्वान् प्रभावयति। ललिते! भवती कुत्र गतवती?

ललिता - अहं कुत्रापि न गतवती। अत्र भाग्यनगरे एव आसम्। परन्तु बहुत्र अटितवती। गोल्कोण्डदुर्गम् आरूढवती। राज्यप्रदर्शनशालां परिशीलितवती। बिर्लामन्दिरं च दृष्टवती।

अमरेशः - वयं त्रयः विभिन्नस्थलानि गतवन्तः। विभिन्नान् विषयान् दृष्टवन्तः ज्ञातवन्तः च।

ललिता - न केवलं वयं, ताः बालिकाः सर्वाः अपि बहुत्र गतवत्यः। नूतनविषयान् ज्ञातवत्यः च।

अरविन्दः - एवं तर्हि भवती एतं सर्वम् आचार्यम् असूचयत् किम्?

ललिता - न असूचयम्। इदानीं सूचयामि।

# २. गीतम्

## ध्येयगीतम्

ईश्वरं च भारतं
प्रणम्य सद्गुरुं तथा।
प्रेरकं हि गीतमेव
साम्प्रतं प्रगीयताम्।।

उज्ज्वलं सुशीलमस्तु
शक्ति-युक्ति-सङ्गतम्।
धर्मरक्षणं तथाऽस्तु
राष्ट्रशक्तिवर्धनम्।।

राष्ट्रबान्धवाः वयं हि
भावनास्तु नः सदा।
पात्रताविकास एव
साध्यमस्तु नः सदा।।

त्यागयुक्तराष्ट्रकार्यम्
एव कुर्महे सदा।
नागरं जगद्धिताय
राष्ट्रमस्तु नः सदा।।

**- गु गणपय्यहोळ्ळः**

SCERT TELANGANA

## सम्भाषणाभ्यासः - ३

### विहारयात्रा (भविष्यत्कालः)

आचार्यः - अस्माकं विद्यालयस्य पक्षतः छात्राणां विहारयात्रा भविष्यति। यात्रार्थं के के आगमिष्यन्ति। नामानि ददतु।

छात्राः - आचार्य! अस्मान् कुत्र कुत्र नेष्यन्ति? किं किं दर्शयिष्यन्ति? अस्माकं पितरः प्रक्ष्यन्ति चेत् किं वदिष्यामः?

आचार्यः - अस्तु, वदिष्यामि। प्रथमम् इतः नागार्जुनसागरं गमिष्यामः। ततः श्रीशैलं गमिष्यामः। ततः महानन्दिनं प्राप्स्यामः। तत्र दर्शनानन्तरं पुट्टपर्तिं गमिष्यामः। ततः श्रीकालहस्तिक्षेत्रं द्रक्ष्यामः। तस्मात् प्रदेशात् तिरुपतिं प्राप्य श्री वेङ्कटेश्वरस्य दर्शनं करिष्यामः। ततः समीपे समुद्रदर्शनं कृत्वा भाग्यनगरं प्राप्स्यामः।

छात्राः - अहो! बहुविधक्षेत्राणि द्रक्ष्यामः। एतानि सर्वाणि क्षेत्राणि दृष्ट्वा बहुज्ञानं सम्पादयिष्यामः।

शङ्करः - एतत् सर्वं जनकाय निवेदयिष्यामः। ते अङ्गीकरिष्यन्ति चेत् अवश्यम् आगमिष्यामः आचार्य!

आचार्यः - न केवलम् आगमनं, धनमपि अर्पणीयम्। तेन धनेन एव अस्माकं भोजनव्यवस्था प्रयाणव्यवस्था च भविष्यति।

रमणः - अवश्यम् आचार्य! धनं समर्पयिष्यामः। आगमनसमये वस्त्राणि, स्यूतं, नित्योपयोगि-वस्तूनि च आनेष्यामः।

यादगिरिः - मध्ये मध्ये पठनार्थं देशभक्तिपुस्तकानि च आनेष्यामः। वयं मार्गमध्ये पठिष्यामः।

शङ्करः - आचार्य! मम समीपे देशभक्तिगीतानां सान्द्रमुद्रिका(सि.डि) अस्ति। तदपि आनेष्यामि। मार्गमध्ये देशभक्तिगीतानि श्रोष्यामः।

आचार्यः - अस्तु। भवन्तः उत्तमाः छात्राः। यत् इच्छन्ति तत् कुर्वन्तु। पुनः मेलिष्यामः।

SCERT TELANGANA

# सम्भाषणाभ्यासः - ४

## वैद्यरोगिसम्भाषणम् (प्रश्नवाचकाः)

सुनीलः - वैद्यमहाशय, नमस्ते।
वैद्यः - नमस्ते। किं नाम भवतः?
सुनीलः - मम नाम सुनीलः।
वैद्यः - अरे! पादस्य व्रणः अभवत्। कथम्?
सुनीलः - द्विचक्रिकायाः चालनसन्दर्भे अधः पतितवान्।
वैद्यः - भवान् कुत्र अपतत्?
सुनीलः - अत्र समीपे एव चत्वरम् (चौरस्ता) अस्ति खलु। तत्र भ्रमणसमये मया गर्तः न दृष्टः। झटिति अधः पतितवान्।
वैद्यः - भाग्यवान् भवान्। बृहत् व्रणः न अभवत्। भवान् कुतः आगच्छति स्म?
सुनीलः - अहं विद्यालयात् गृहं प्रति गच्छामि स्म।
वैद्यः - एषा घटना कदा अभवत्? भवतः विद्यालयः कदा समाप्यते।
सुनीलः - विद्यालयः चतुर्वादने समाप्यते। सार्धचतुर्वादने एषा घटना प्रवृत्ता।
वैद्यः - आम्। व्रणस्य शुभ्रता समाप्ता। अधुना सूच्यौषधं ददामि। भयं मास्तु।
सुनीलः - मास्तु भोः, गुलिकाः ददातु।
वैद्यः - किमर्थं भयम् अनुभवति भोः? सूच्यौषधं बाधां विना दास्यामि। इतःपरं सूच्यौषधस्य भयमेव न भवति।
सुनीलः - अरे, कदा समाप्तम्? बाधा एव न आसीत्। कति निमेषाः अभवन्?
वैद्यः - इतःपूर्वमेव।भवान् भयेन नेत्रे निमीलितवान्।
सुनीलः - कति गुलिकाः ददाति भवान्? कति दिनानि गुलिकाः खादामि?
वैद्यः - अधुना नवगुलिकाः ददामि। दिनत्रयं यावत् स्वीकरोतु।
सुनीलः - पुनः कदा अत्र आगच्छामि वैद्यमहोदय?
वैद्यः - दिनत्रये पादपीडा अपगच्छति। यदि न अपगच्छति तर्हि अत्र आगच्छतु।
सुनीलः - भवतः कृते कति रूप्यकाणि देयानि?
वैद्यः - मास्तु भोः, अहं सेवाकार्यं करोमि।
सुनीलः - धन्यवादः वैद्यमहोदय! पुनः मेलिष्यामः।

☞ अध्यापकेन एतत् सम्भाषणं लघुनाटकरूपेण छात्रैः विभिन्नकार्यक्रमेषु प्रदर्शनीयम्।

SCERT TELANGANA

# सम्भाषणाभ्यासः - ५

## सेवासदनम् (द्वितीया विभक्तिः)

आचार्यः - अत्र समीपे एकं सेवासदनम् अस्ति। वयं सर्वे तत्र गच्छामः। सर्वे चलन्तु।

छात्राः - आचार्य! तत्र ते किं किं कुर्वन्ति।

आचार्यः - तत् सर्वं तत्र गमनानन्तरं पृष्ट्वा जानीमः।

छात्राः - अस्तु, तथैव।

आचार्यः - इतस्ततः मा गच्छन्तु। क्रमशः पङ्क्तौ तिष्ठन्तु, चलामः।

छात्राः - अस्तु, तथैव श्रीमन्!

प्रबन्धकः - आगच्छन्तु, सर्वे छात्राः! स्वागतम्।

छात्राः - आचार्य! वयं विविधप्रश्नान् पृच्छामः, समाधानानि च ज्ञास्यामः। भवान् अनुमतिं ददाति वा।

आचार्यः - अस्तु भवन्तः यथेच्छं प्रश्नान् पृच्छन्तु। प्रबन्धकः समाधानानि वदिष्यति।

छात्राः - महाशय! अत्र कानि कानि कार्याणि शिक्षयन्ति। वयं श्रोतुम् इच्छामः।

प्रबन्धकः - अत्र बहुविधानि शिक्षणकेन्द्राणि चालयामः। महिलानां कृते सीवनशिक्षणं, वीथीबालानां शिक्षणाय युवकानां प्रशिक्षणं, विविधवस्तूनां निर्माणप्रशिक्षणं च अत्र आयोजयामः।

छात्राः - बहु उत्तमम् अस्ति। अस्माकं सहकारम् अपि भवन्तः स्वीकुर्वन्ति वा ?

प्रबन्धकः - कुतो न? अवश्यं स्वीकुर्मः। भवन्तः किं कर्तुं शक्नुवन्ति?

छात्राः - वयम् अस्माकं मातापितरौ सूचयिष्यामः। ते अपि अत्र आगच्छन्ति। कस्यापि छात्रस्य जन्मदिनावसरे वयं सकुटुम्बम् आगच्छामः। तस्य जन्मदिनं वयं वैभवेन आचरामः।

प्रबन्धकः - उत्तमः विचारः। अवश्यं तथैव भवतु।

छात्राः - यथाशक्ति वयं सहकारं कुर्मः। पुनः मिलामः।

SCERT TELANGANA

# ३. गीतम्

## अनुशासनम्

मा कुरु दर्पं, मा कुरु गर्वं
मा भव मानी मानय सर्वम्।
मा भज दैन्यं मा भज शोकं
मुदितमना भव मोदय लोकम्

मा वद मिथ्यां मा वद व्यर्थं
न चल कुमार्गे न कुरु अनर्थम्।
पाहि अनाथं पालय दीनं
लालय जननी-जनक-विहीनम्।।

तनयं पाठय तनयां पाठय
शिक्षय सुगुणं दुर्गुणं वारय।
कुरु उपकारं कुरु उद्धारम्
अपनय भारं त्यज अपकारम्।

मा पिब मादकवस्तु अपेयम्
मा भज दुर्व्यसनं परिहेयम्।
मा नय क्षणमपि व्यर्थं समयं
कुरु सकलं निजकार्यं सभयम्।।

**- वासुदेवद्विवेदी शास्त्री**

SCERT TELANGANA

**प्रथमभागः**

प्रथमः पाठः

# १. विद्यास्वाम्यम्

**चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।**




१. चित्रे बालाः किं कुर्वन्ति?
२. भवतां पाठशालायाम् एतादृशं कार्यक्रमं भवान् दृष्टवान् वा? तस्मिन् भागं स्वीकृतवान् वा? कदा?
३. भवान्/भवती पाठशालां प्रतिदिनं किमर्थम् आगच्छति?

**पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।**





आगच्छतेतः बालाः
आगच्छतेतः बालाः
मधुरं मधुरं मे वचनं
संश्रुणुतेदं मनोहरम्।

विद्यानिलयं प्रयामः
पद्यं गद्यं पठामः
पठने स्वाम्यम् अस्माकम्
पालकैस्तत् प्रकल्पितम्।

विद्यास्वाम्यम् अस्माकं
बालानामिह स्वाम्यरक्षकं
पुस्तकमन्नं प्रददाति
क्रीडाङ्गणमिह विदधाति।

दूरदर्शनात् विश्वज्ञानं
सङ्गणकादपि सार्वकालिकं
सर्वेषामपि समवस्त्रं
दत्वा समतां दर्शयति।



श्रमखिन्नानां बालानां
छायावासं कल्पयति
निःशुल्कविद्यां बोधयति
योग्यं स्थानं प्रापयति।

।। आगच्छतेतः बालाः।।

- डा. धूलिपाल रामकृष्णः





## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. पाठशालायां के किं कुर्वन्ति?

आ. कम्प्यूटर्, यूनिफाम्, ग्रौण्ड् इत्येतेषां पदानां संस्कृतनामानि वदन्तु।

इ. सर्वकारः छात्राणां कृते मध्याह्नभोजनं किमर्थं कल्पयति?

ई. गीतं कान् उद्दिश्य लिखितम्?

उ. समवस्त्रं किमर्थम्?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



**अ. पठन्तु अवगच्छन्तु।**

బాలల్లారా! ఇటు రా రండి. ఎంతో తీయనైన మనస్సుకింపైన నా మాటను వినండి. చదువుకు నెలవైన పాఠశాలకు వెళ్దాం. పద్యం, గద్యం, చదువుకుందాం. చదువుకునే హక్కు మనది. పాలకులు దానిని కల్పించారు. ఈ విద్యాహక్కును రక్షించేదే పాఠశాల.

విద్యాలయం మనకు అన్నం పెడుతుంది. పుస్తకాలు ఇస్తుంది. ఆడుకోవటానికి మైదానం ఉంటుంది. టి.వి ద్వారా ప్రపంచజ్ఞానం, కంప్యూటర్ ద్వారా అన్ని సంగతులు అందిస్తుంది. అందరికి యూనిఫాం దుస్తులనిచ్చి, సమానతను చూపుతుంది.

బాల్యంలోనే శ్రమిస్తూ బాధపడుతున్న బాలలచే పని మాన్పించి, వారికి నీడనూ, ఆవాసాన్ని పాఠశాల కల్పిస్తోంది. ఇంకా ఫీజులు లేని చదువును అందిస్తుంది. సమాజంలో యోగ్యమైన స్థానాన్ని పొందింపజేస్తుంది.

బాలల్లారా! పాఠశాలకు రా రండి. చదువే మన హక్కు అని చాటండి.



**आ. गीतस्य भावं स्ववाक्यैः वदन्तु।**

**इ. अधः दत्तानि पदानि गीते अन्विष्य तेषामधः रेखाङ्कनं कुर्वन्तु। पदकोशं दृष्ट्वा तेषाम् अर्थान् जानन्तु।**

विद्यानिलयम्, श्रमखिन्नानाम्, स्वाम्यरक्षणम्, स्वाम्यम्, विश्वज्ञानम्, प्रकल्पितम्, सार्वकालिकम्, निःशुल्कविद्याम्।

**ई. अधः दत्तानि वाक्यानि पठन्तु। तत्समानार्थकवाक्यानि पाठे अन्विष्य लिखन्तु।**

1. అందమైన మాటలను చక్కగా వినండి. – ....................................

2. ఉచితవిద్యను బోధిస్తున్నది. – ....................................

SCERT TELANGANA

3. ఇచ్చి సమానత్వాన్ని చూపిస్తున్నది. - ......................................

4. పిల్లల యొక్క హక్కును రక్షిస్తున్నది. - ......................................

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. पाठशाला किं किं ददाति?

२. पाठशाला किं किं कल्पयति?

३. बालानां स्वाम्यं कस्मिन् विषये वर्तते?

४. सार्वकालिकम् इति पदस्य भावः कः?



### आ. चिन्तयन्तु, लिखन्तु

१. अत्र कानिचन पदानि दत्तानि। तानि उपयुज्य पाठशालां वर्णयन्तु?

पुस्तकम्   अन्नम्   सङ्गणकम्   समवस्त्रम्   दूरदर्शनम्

२. विद्यालये विद्या न प्राप्यते चेत् किं भवति?

३. निरक्षराः बालाः किं कुर्वन्ति?

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. गीतेऽस्मिन् 'ति' इत्यक्षरयुक्तानि पदानि सन्ति। अर्थानुसारं तानि अन्विष्य लिखन्तु।

1. ఇచ్చుచున్నది -
2. బోధించుచున్నది -
3. చూపిస్తున్నది -
4. పొందేలా చేస్తున్నది -

### आ. अधः दत्तानि पदानि उपयुज्य स्वीयवाक्यानि लिखन्तु।

१. विश्वज्ञानम्   २. छायावासम्   ३. निःशुल्कम्   ४. क्रीडाङ्गणम्

५. विद्यानिलयम्   ६. मनोहरम्   ७. समवस्त्रम्

### इ. अधः दत्ते पदद्वये एकमेकम् अग्रे वा अन्तिमे वा योजयित्वा नूतनपदानि लिखन्तु।

| योग्यम् | स्वाम्यम् |
|---|---|
| उदा।। योग्यं कार्यम्/गमनयोग्यम् | विद्यास्वाम्यम् |
| १. | |
| २. | |
| ३. | |

SCERT TELANGANA

## ५. व्याकरणांशाः



**अ. अधः दत्तानि पदानि पाठे अन्विष्य चिह्नीकुर्वन्तु।**

आगच्छत, संश्रुणुत, प्रयाम, पठाम ।

☞ एतानि पदानि लोट् लकारे सन्ति। एतानि विधिः, आज्ञा इत्यादीन् अर्थान् बोधयन्ति।

**आ. पठधातोः लोट्लकाररूपाणि लिखन्तु ।**

**इ. अधः दत्तानि उदाहरणानि पठन्तु।**

१. शिरीषे! गीतं पठतु।   २. पुत्र! वाक्यं पठ।

३. बालाः! पाठं पठन्तु।   ४. वयं गीतं पठाम।

**ई. लटः रूपाणां लोट् लकारे परिवर्तनम् अवगच्छन्तु।**

| **वर्तमानकाले लट्लकारः** | **आज्ञार्थे लोट्लकारः** |
|---|---|
| १. बालाः गीतं गायन्ति। | २. बालाः! गीतं गायन्तु। |
| ३. देशसैनिकाः देशं रक्षन्ति। | ४. देशसैनिकाः! देशं रक्षन्तु। |

**उ. अधः दत्तानि वर्तमानकालस्य लट्लकाररूपाणि पाठे सन्ति। एतेषां परिवर्तनं लोट्लकारे कुर्वन्तु।**

१. कल्पयति ..................   १. बोधयति ..................

३. आगच्छति ...................   ४. श्रुणोति ....................

**ऊ. अधः दत्तानि रेखाङ्कितपदानि चित्रं दृष्ट्वा पठन्तु।**



उन्नतः पर्वतः



सुन्दरी बालिका



विशालं भवनम्

उपर्युक्तानि चित्रेषु उन्नतः, सुन्दरी, विशालम् इत्येतानि पदानि पर्वतः, बालिका, भवनम् इत्येतेषां पदानां विशेषतां बोधयन्ति। अतः उन्नतः, सुन्दरी, विशालं, इत्येतानि विशेषणपदानि। पर्वतः, बालिका, भवनम् इत्येतानि विशेष्यपदानि।

☞ यत् पदं विशेषतां बोधयति तत् पदं विशेषणपदम्। यस्य पदस्य विशेषता बोध्यते तत् पदं विशेष्यपदम्।

SCERT TELANGANA

ऋ. अधः दत्तानि वाक्यानि अवगच्छन्तु।

| पुंलिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|
| सुन्दरः बालकः | सुन्दरी बालिका | सुन्दरं भवनम् |
| रक्तः स्यूतः | रक्ता पेटिका | रक्तं पुष्पम् |
| दीर्घः मार्गः | दीर्घा वेणी | दीर्घम् उद्यानम् |
| निर्मलः आकाशः | निर्मला शाटिका | निर्मलं वस्त्रम् |

ॠ. विशेष्यपदस्य आधारेण विशेषणपदे समुचितं लिङ्गं संयोज्य लिखन्तु।

१. ................ कार्यम् (उत्तम)
२. ................ वाक्यम् (मधुर)
३. ................ घटना (अद्भुत)
४. ................ उपकारः (विचित्र)
५. ................ सेवकः (मूर्ख)
६. ................ गायिका (प्रवीण)
७. ................ रचनम् (प्रिय)
८. ................ जलम् (शीतल)

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. बाल्ये विद्यार्थिजीवन-श्रामिकजीवनयोः मध्ये किं वरं भवति? तोलनं कुर्वन्तु।






## ७. परियोजनाकार्यम्



अ. भवतां प्रतिवेशिनः बालाः ये विद्यालयं न आगतवन्तः, तान् मधुरवचनैः विद्यालयम् आनयन्तु। नोचेत् तान् उद्दिश्य अध्यापकं सूचयन्तु।

SCERT TELANGANA

## ८. प्रशंसा



जनकः - अहम् अद्य कर्म कर्तुं न शक्नोमि। आरोग्यं समीचीनं नास्ति। अय्यप्प! भवान् गत्वा कर्म करोतु। लिपिकः सायं द्विशतरूप्यकाणि ददाति। आनयतु।

अय्यप्पः (पुत्रः) - अहं न गच्छामि। अहं तु पाठशालां गच्छामि। तत्रैव भोजनमपि करिष्यामि।

जनकः - मम वचनं भवान् न श्रुणोति वा?

अय्यप्पः - जनक! बाल्ये अनध्ययनेन भवान् इदानीम् अतिकष्टेन जीवनं यापयति। अम्बा च कर्म करोति। एतां स्थितिम् अहं द्रष्टुं न शक्नोमि। उन्नतविद्यां प्राप्य पदवीं प्राप्तुम् इच्छामि। भवन्तौ सम्यक् पोषयिष्यामि।

जनकः - सत्यम्। भवान् उचितम् उक्तवान्। शालां गच्छतु। (विद्यया जीवने उन्नतस्थानं प्राप्तवतः जनान् उद्दिश्य वदन्तु ।)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| अ. गीतं सरागं गातुं शक्नोमि । | | | |
| आ. गीतस्य भावं स्वीयवाक्यैः वक्तुं शक्नोमि । | | | |
| इ. पाठशालायाः विशिष्टतां लेखितुं शक्नोमि । | | | |
| ई. विद्यार्थिजीवन-श्रामिकजीवनयोः तोलनं कर्तुं शक्नोमि। | | | |




SCERT TELANGANA

द्वितीयः पाठः

# २. पञ्चशी पञ्चमी पञ्च नशी नमी

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु




१. अत्र कति वार्षिककालदर्शन्यः दृश्यन्ते?

२. आंग्ल-आन्ध्र-संस्कृतकालदर्शिनीषु भेदाः के?

३. भवान्/भवती संस्कृतकालदर्शिनीं दृष्टवान् / दृष्टवती वा? कुत्र?

**पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।**



एकस्मिन् घोरारण्ये एकः ब्रह्मराक्षसः स्वभार्यया सह प्रतिवसति स्म। तस्य भार्या ब्रह्मराक्षसी विचित्रस्वभावा। समीपस्थस्य राज्यस्य आस्थानपण्डितः महाबुद्धिमान् इति सा अश्रुणोत्। ''तस्य आस्थानपण्डितस्य मस्तिष्कं भक्षयित्वा अहमपि महाबुद्धिमती भविष्यामि'' इति सा अचिन्तयत्। तं पण्डितं हत्वा तस्य मस्तिष्कम् आनय'' इति सा स्वपतिं पर्यपीडयत्। ब्रह्मराक्षसः स्वप्रियभार्यायाः इच्छां पूरयितुम् उद्युक्तः भूत्वा आस्थानपण्डितं मारयितुम् एकम् उपायम् अचिन्तयत्।

सः ब्रह्मराक्षसः कामरूपधारी। एकस्मिन् दिने सः पण्डितवेषं धृत्वा महाराजसभायां प्रविश्य महाराजम् एवम् अवदत्। ''भोः! महाराज! मम नाम डिण्डिमभट्टः। काशीतः आगच्छम्। काश्यां सर्वशास्त्राणि अपठम्। देशे सर्वत्र अटन् सर्वानपि प्रसिद्धान् पण्डितान् मम पाण्डित्येन पराजितवान्। इदानीं



TELANGANA



भवतः आस्थानपण्डितं मम बुद्धिबलेन पराजेतुम् अत्र आगच्छम्। आस्थानपण्डितम् एकमेव प्रश्नं पृच्छामि। यदि सः मम प्रश्नस्य उचितं समाधानं दास्यति तर्हि अहं तस्मै शतकिलोपरिमितं सुवर्णं दास्यामि। यदि सः पराजितः भविष्यति तर्हि मम सेवकः भूत्वा मया सह आगच्छेत्'' इति।

''प्रश्नं पृच्छतु'' इति महाराजः आदिशत्। ''पञ्चशी पञ्चमी पञ्चनशीनमी'' - एषः मम पश्नः। अस्य सम्पूर्णम् उत्तरं दातव्यम् इति डिण्डिमभट्टः सगर्वम् अवदत्।

महाराजः आस्थानपण्डितम् अपश्यत्। एतं विचित्रं प्रश्नं समाधातुम् अशक्तः आस्थनपण्डितः समाधानार्थम् एकमासावधिम् अपृच्छत्। डिण्डिमभट्टः ''एकमासानन्तरं पुनः आगमिष्यामि'' इत्युक्त्वा स्वस्थानं निरगच्छत्।

आस्थानपण्डितः नवविंशतिदिनानि बहून् ग्रन्थान् पठित्वापि तस्य विचित्रप्रश्नस्य समाधानं न प्राप्नोत्। अतः सः नवविंशे दिने पराजयभीत्या अरण्यं पलायितवान्। गहनारण्यं प्रविश्य सः एकस्य महावृक्षस्य अधः गुल्मेषु रहस्येन उपाविशत्। तस्मिन्नेव महावृक्षे ब्रह्मराक्षसदम्पत्योः वासः।



‘‘नवविंशतिदिनानि अतीतानि। अद्यावधि भवान् ममेच्छां न अपूरयदेव। कदा तस्य आस्थानपण्डितस्य मस्तिष्कम् आनेष्यति? कदा अहं तत् खादिष्यामि? इति ब्रह्मराक्षसी स्वपतिं क्रोधेन अपृच्छत्। ब्रह्मराक्षसः राजसभायां प्रवृत्तं सर्वं ताम् अवदत्। तस्य प्रश्नस्य समाधानं किम्? इति ब्रह्मराक्षसी अपृच्छत्। प्रिये ! शृणोतु ‘पञ्चशी इत्युक्ते पञ्चशकारयुक्ताः तिथयः। ताश्च दशमी, एकादशी, द्वादशी, त्रयोदशी, चतुर्दशी। पञ्चमी इत्युक्ते पञ्चमकारयुक्ताः तिथयः ताः पञ्चमी, सप्तमी, अष्टमी, नवमी, दशमी। पञ्चनशीनमी इत्युक्ते यासु तिथिषु शकारः मकारः वा नास्ति ताः तिथयः। ताश्च प्रतिपद्, द्वितीया, तृतीया, चतुर्थी, षष्ठी।

गुल्मेषु रहस्येन उपविष्टः आस्थानपण्डितः ब्रह्मराक्षसेन उक्तं समाधानं श्रुत्वा अत्यन्तम् आनन्दितः अभवत्। सः अत्यन्तरहस्येन ततः निर्गत्य स्वगृहम् आगच्छत्। अनन्तरदिने ब्रह्मराक्षसः डिण्डिमभट्टवेषं धृत्वा राजसभां प्राविशत्।

‘‘भोः! आस्थानपण्डित! त्वया स्वीकृतः एकमासावधिः समाप्तः। शीघ्रं मम प्रश्नस्य समाधानं वद! अन्यथा मम सेवकः भूत्वा मया सह आगच्छ’’ इति ब्रह्मराक्षसः आस्थानपण्डितम् अवदत्।

आस्थानपण्डितः निर्भयेन सभायां सविवरणं तस्य प्रश्नस्य समाधानम् अवदत्। तत् श्रुतवतां सर्वेषां सभ्यानां महान् करतालध्वनिः अभवत्। डिण्डिमभट्टः स्वपराजयम् अङ्गीकृत्य स्ववचनानुसारं शतकिलोपरिमितं सुवर्णम् आस्थानपण्डिताय दत्त्वा ततः निरगच्छत्।



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. ब्रह्मराक्षसस्य आकारः कीदृशः?

आ. ब्रह्मराक्षसदम्पती कुत्र वसतः?

इ. राजसभायां किं किं भवति?

ई. ब्रह्मराक्षस्याः/ब्रह्मराक्षसस्य आहारः कः?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तानि पदानि पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु। पदकोशं दृष्ट्वा तेषाम् अर्थान् जानन्तु।

| | | | |
|---|---|---|---|
| घोरारण्ये | विचित्रस्वभावा | महाबुद्धिमान् | कामरूपधारी |
| महाराजसभायाम् | शतकिलोपरिमितम् | एकमासावधिम् | गुल्मेषु |
| पञ्चशकारयुक्ताः | करतालध्वनिः | विचित्रप्रश्नस्य | स्वपराजयम् |

आ. अधः दत्तानि वाक्यानि पठन्तु। तत्समानार्थकवाक्यानि पाठे अन्विष्य लिखन्तु।



1. నేను కూడా బుద్ధిమంతురాలిని అవుతాను.
2. ఓ రాజా! నా పేరు డిండిమభట్టు.
3. నెల తరువాత మళ్ళీ వస్తాను.
4. ఇంతవరకూ నా కోరిక తీర్చలేదు.
5. సమాధానం విని చాలా సంతోషించాడు.

इ. रिक्तस्थानानि पूरयित्वा तिथीः जानन्तु।

| | | | | |
|---|---|---|---|---|
| १. एकम् | - | प्रतिपत् | - | పాడ్యమి |
| २. द्वे | - | द्वितीया | - | విదియ |
| ३. त्रीणि | - | ............. | - | .................. |
| ४. चत्वारि | - | ............. | - | .................. |
| ५. पञ्च | - | ............. | - | .................. |
| ६. षट् | - | ............. | - | .................. |
| ७. सप्त | - | ............. | - | .................. |
| ८. अष्ट | - | ............. | - | .................. |
| ९. नव | - | ............. | - | .................. |
| १०. दश | - | ............. | - | .................. |

SCERT TELANGANA

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. ब्रह्मराक्षसः राजसभायां गत्वा किम् उक्तवान्?
२. ब्रह्मराक्षसः कं प्रश्नं पृष्टवान्?
३. डिण्डिमभट्टस्य प्रश्नस्य समाधानं किम्?
४. आस्थानपण्डितं मारयितुं ब्रह्मराक्षसः कम् उपायं चिन्तितवान्?
५. ब्रह्मराक्षस्याः इच्छा का?
६. तिथीः क्रमशः लिखन्तु।



### आ. चिन्तयन्तु, लिखन्तु

१. आस्थानपण्डितः किमर्थम् अरण्यं पलायितवान्।
२. कथायां बुद्धिमान् कः? विचिन्त्य कारणं वदन्तु।
३. कथायाः सारांशं सरलवाक्यैः लिखन्तु।
४. आस्थानपण्डितः किमर्थम् एकमासावधिं पृष्टवान्?
५. कथायाः अपरां शीर्षिकां लिखन्तु ।

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. "त्रिंशत् सङ्ख्यां जानीमः"।

३, ६, ९, १२, १५, १८, २१,२४, २७, ३०, इत्येते त्रिगुणकसङ्ख्याः। कक्ष्यायां छात्राः गोलाकारेण उपविशेयुः। बालाः क्रमशः एकं, द्वे, त्रीणि इति क्रमेण सङ्ख्याः वदेयुः। तृतीयसङ्ख्यायाः स्थाने करताडनं करणीयम्। अथवा 'ओम्' कारम् उच्चारेयुः। (सङ्ख्या मुखेन न वक्तव्या) यः/या तृतीयसङ्ख्यायाः स्थाने सङ्ख्यां वदति सः/सा बहिः (out) भवति।

### आ. एतानि पदानि उपयुज्य स्वीयवाक्यानि लिखन्तु।

१. करतालध्वनिः, २. निर्भयेन, ३. बुद्धिबलेन, ४. स्वस्थानम्

## ५. व्याकरणांशाः



### अ. पूरणप्रत्ययान्ताः

**१. कक्ष्यायाम् अध्यापिका प्रगतिपत्राणि ददाति।**

अध्यापिका - सुरेश! अर्धवार्षिकपरीक्षासु भवान् ४९० अङ्कैः प्रथमस्थानं प्राप्तवान्। सर्वे एतं शुभकामनाः वदन्तु।
सुरेशः - धन्यवादाः।
अध्यापिका - अनेन क्रमेण रघुनन्दनः द्वितीयस्थानम्।

SCERT TELANGANA

श्रीवल्ली तृतीयस्थानम्, वसन्तः चतुर्थस्थानम्, रमणः पञ्चमस्थानम्, श्रीदेवी षष्ठस्थानम्, सुषमा सप्तमस्थानम्, वन्दना अष्टमस्थानम्, किरीटी नवमस्थानम्, भूलक्ष्मीः दशमस्थानञ्च प्राप्तवन्तः।

अपि च गोविन्दः एकादशं, वाणी द्वादशं, ज्योतिका त्रयोदशं, आनन्दः चतुर्दशं, नागराजः पञ्चदशं च स्थानं प्राप्तवन्तः।

**२. अत्र सङ्ख्यापठने कः भेदः इति अवगच्छन्तु।**

**एकम्** - केवलं सङ्ख्यागणनसन्दर्भे वदामः।

**प्रथमः** - प्रत्येकं व्यक्तेः अध्यायस्य वा क्रमगणनसन्दर्भे एवं वदामः। स्थानानां लेखनसमये वाचनसमये च लिङ्गानुगुणं विभक्तिः योजनीया।

**उदा॥** प्रथमः अध्यायः

प्रथमा प्रतिमा

प्रथमम् स्थानम्

चित्राणि पश्यन्तु - एकैकस्य एकैका संख्या अस्ति। सा संख्या EAMCET मध्ये तेषां स्थानानि सूचयति।

भवान्/भवती कस्य कतमं स्थानम् इति क्रमेण वदतु, लिखतु।




SCERT TELANGANA

## ६. सर्जनात्मकव्यक्तीकरणम्



**अ. संवादरूपेण लिखन्तु। इमां कथाम् अभिनयेन दर्शयन्तु च।**

**आ. अधः दत्तस्य श्लोकस्य भावम् अवगच्छन्तु।**

एको ना विंशतिः स्त्रीणां काष्टार्थम् अटवीं गता ।
विंशतिः पुनरायाता एको व्याघ्रेण भक्षितः ।।

## ७. परियोजनाकार्यम्



**अ. दिवा रात्रिः च कथं भवतः। तिथयः कथं भवन्ति? इत्यंशं भित्तिपत्रके लिखित्वा आनयन्तु।**

## ८. प्रशंसा



विजयदशम्याः विरामाणाम् अनन्तरं सर्वे विद्यार्थिनः विद्यालयं पुनरागताः।

आचार्यः - प्रियच्छात्राः! विरामेषु के के किं किं कृतवन्तः?

स्नेहलता - आचार्य! अहं मातामह्याः साहाय्येन एकां सूचीं निर्मितवती यत्र कस्यां कस्यां तिथ्यां कः उत्सवः भवतीति सम्यक् लिखितमस्ति इति दर्शयति।

आचार्यः - साधु साधु। सर्वेभ्यः एतामेव परियोजनां यच्छामि। कृत्वा आनयन्तु। भित्तिपत्रे च सुन्दरतया लिखन्तु।

(विरामदिनेषु उतमकार्यं कृतवन्तं बालकं भवान्/भवती कथम् अभिनन्दति ।)



### स्वीयमूल्याङ्कनम्



| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. पाठस्य कथां स्वीयवाक्यैः वक्तुं शक्नोमि । | | | |
| ३. कथायाः सारांशं सरलवाक्यैः लेखितुं शक्नोमि । | | | |
| ४. पाठं संवादरूपेण लेखितुं वार्षिकोत्सवे प्रदर्शयितुं च शक्नोमि । | | | |

★ ★ ★

SCERT TELANGANA

द्वितीयभागः

तृतीयः पाठः

# ३. अरण्यम्

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।




१. चित्रे आपणिकः कस्य विक्रयणं करोति ?
२. जनाः आपणिकं किं पृच्छन्ति ?
३. नारिकेलस्य अन्यानि नामानि वदन्तु।
४. एकस्य वस्तुनः विभिन्नानि नामानि वदन्तु।

**पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।**



अटव्यरण्यं विपिनं गहनं काननं वनम्।
महारण्यम् अरण्यानी गृहारामस्तु निष्कुटः।।

वृक्षो महीरुहश्शाखी विटपी पादपस्तरुः।
अनोकहः कुटस्सालः पलाशी द्रुद्रुमागमाः।।

पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्।
पल्लवोऽस्त्री किसलयं विस्तारो विटपोऽस्त्रियाम्।।

स्त्रियस्सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्।
मकरन्दः पुष्परसः परागस्सुमनोरजः।।

TELANGANA



खगो विहङ्ग-विहग-विहङ्गम-विहायसः।
शकुन्ति-पक्षि शकुनि-शकुन्त-शकुनद्विजाः।।

पतत्रि-पत्रि-पतग-पतत्-पत्ररथाण्डजाः।
नगौको-वाजि-विकिर-विविष्करपतत्रयः।।

नीडोद्भवा गरुत्मन्तः पित्सन्तो नभसङ्गमाः।



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. पाठ्यांशचित्रे किं किम् अस्ति?
आ. क्रूरमृगाः कुत्र वसन्ति?
इ. अरण्यं कथं भवति?
ई. गृहे भवतः अन्यत् नाम अस्ति चेत् वदन्तु?
उ. जलम्, अग्निः इत्यनयोः अन्यनामानि वदन्तु।

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. पदानां भावान् अवगच्छन्तु। तानि चित्रैः सह योजयन्तु।

१. अटवी, अरण्यम्, विपिनम्, गहनम्, वनम्, काननम् महारण्यम्।



२. गृहारामः, निष्कुटः।



३. वृक्षः, महीरुहः, शाखी, विटपी, पादपः, तरुः।



४. पत्रम्, पलाशम्, छदनम्, दलम्, पर्णम्, छदः।



५. पल्लवः, किसलयः।



SCERT TELANGANA

६. विस्तारः, विटपः।



७. सुमनसः, पुष्पम्, प्रसूनम्, कुसुमम्, सुमम्।



८. मकरन्दः, पुष्परसः।



९. परागः, सुमनोरथः।



१०. खगः, विहङ्गः, विहङ्गमः, विहायसः, शकुन्तिः, शकुनिः, शकुन्तः, शकुनः, नभसङ्गमः, गरुत्मान्, पक्षी, पतत्री, पत्री, पत्ररथी, पतत्रिः, पतत्, पतगः, द्विजः, अण्डजः, नीडोद्भवः, वाजी, नगौकः, पित्सन्तः, विकिरः, विष्करः।



**आ. अत्र प्रत्येकपङ्क्तौ चत्वारि पर्यायपदानि सन्ति। तेषु एकं भिन्नं पदम् अस्ति। तत् अन्विष्य लिखन्तु।**

१. पुष्पम्, प्रसूनम्, विपिनम्, कुसुमम्। ................
२. पलाशम्, पलाशी, दलम्, छदः। ................
३. विहगः, खगः, द्विजः, कुटः। ................
४. अण्डजः, पतत्रिः, पुष्परसः, शकुनिः। ................
५. अरण्यम्, वनम्, गहनम्, पर्णम्। ................
६. मकरन्दः, विहायसः, सूकरः, पक्षी। ................
७. गृहारामः, सालः, द्रुमः, तरुः। ................
८. नगौकः, पतत्री, शाखी, विकिरः। ................
९. महीरुहः, विटपः, अनोकहः, पादपः। ................
१०. दलम्, पत्रम्, सुमनाः, छदः। ................

SCERT TELANGANA

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. अरण्यस्य अन्यनामानि लिखन्तु।

२. 'वृक्षः' इति पदस्य अन्यनामानि लिखन्तु।

३. खगस्य नामानि लिखन्तु।

### आ. चिन्तयन्तु, लिखन्तु

१. एकस्य चित्रस्य/ एकस्य पदार्थस्य/ एकस्य विषयस्य अनेकानि नामानि सन्ति इति अवगतम् खलु! अनेन ज्ञानेन उपयोगः कः इत्यंशं पञ्चवाक्यैः लिखन्तु।

२. जीवसमतौल्यं नाम किम्? अरण्येन/वृक्षैः लाभाः के?

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



पाठस्थाः सर्वेऽपि शब्दाः तत्तल्लिङ्गानुसारम् अत्र योजनीयाः।

| पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|
| | | |

## ५. व्याकरणांशाः



### अ. अत्र शिवस्य दिनचर्या दत्ता। तां पठित्वा सः केन /कया सह किं करोतीति लिखन्तु।

मीनायाः अग्रजः शिवः। सः अम्बया सह निद्रातः उत्तिष्ठति। दन्तकूर्चेन दन्तधावनं करोति। चषकेण क्षीरं पिबति। मित्रैः सह धावति। सुफेनकेन/उष्णजलेन स्नानं करोति। अनुजया सह अल्पाहारं स्वीकरोति। शिवः लेखन्या गृहपाठं लिखति। अङ्गुल्या न लिखति। मीनया सह द्विचक्रिकया पाठशालां गच्छति। श्रद्धया पाठं श्रृणोति।

| | केन सह/कया सह | किं करोति |
|---|---|---|
| शिवः | | उत्तिष्ठति। |
| | | दन्तधावनं करोति। |
| | | क्षीरं पिबति। |
| | | धावति। |
| | | स्नानं करोति। |
| | | अल्पाहारं करोति। |
| | | शालां गच्छति। |
| | | गृहपाठं लिखति। |

## आ. सन्धिः

वर्णानाम् अतिशयितः सन्निधिः (अतिसामीप्यं) सन्धिः इति। द्वयोः वर्णयोः सन्निकर्षात् यः विकारः जायते सः सन्धिः इत्युच्यते। सन्धिः त्रिप्रकारकः -

१. स्वरसन्धिः २. व्यञ्जनसन्धिः ३. विसर्गसन्धिः

### स्वरसन्धिः

स्वरात् स्वरे परे स्वरसन्धिः भवति।

स्वरसन्धिः = स्वरः + स्वरः

स्वरसन्धयः अष्टविधाः। अत्र केवलं चतुर्विधाः सन्धयः बोध्यन्ते। ते च -

अ. सवर्णदीर्घसन्धिः आ. गुणसन्धिः इ. वृद्धिसन्धिः ई. यणूसन्धिः

### सवर्णदीर्घसन्धिः

**१. एतानि उदाहरणानि परिशीलयन्तु।**

1. परम + अर्थः
   = परम् + अ + अर्थः = परमार्थः। (अ + अ = आ )
2. विद्या + अभ्यासः
   = विद्य् + आ + अभ्यासः = विद्याभ्यासः । (आ + अ = आ)

अ/आ + अ/आ = आ

SCERT TELANGANA

3. कवि + इन्द्रः

= कव् + इ + इन्द्रः = कवीन्द्रः। (इ + इ = ई)

4. मही + ईशः

= मह् + ई + ईशः = महीशः। (ई+ ई= ई)

इ/ई + इ/ई = ई

5. भानु + उदयः

= भान् + उ + उदयः = भानूदयः । (उ + उ = ऊ )

6. वधू + उत्साहः

= वध् + ऊ + उत्साहः = वधूत्साहः । (ऊ + उ = ऊ)

उ/ऊ + उ/ऊ = ऊ

7. पितृ + ऋणम्

= पित् + ऋ + ऋणम् = पितृणम् । ( ऋ + ऋ = ॠ )

8. होतृ + ऌकारः

= होत् + ऋ + ऌकारः = होतॄकारः । ( ऋ + ऌ = ॠ )

ऋ + ऋ/ऌ = ॠ

अ, आ इत्येताभ्याम् 'अ, आ' इत्येतयोः परयोः आकारः, 'इ, ई' इत्येताभ्याम् 'इ, ई' इत्येतयोःपरयोः ईकारः, 'उ, ऊ' इत्येताभ्याम् 'उ, ऊ' इत्येतयोः परयोः ऊकारः, 'ऋ' इत्यस्मात् 'ऋ, ऌ' इत्येतयोः परयोः ॠकारः, पूर्वपरयोः स्थाने एकादेशः भवति। एषः सवर्णदीर्घसन्धिः इत्युच्यते ।

| | | | |
|---|---|---|---|
| अ आ | इ ई | उ ऊ | ऋ |
| आ | ई | ऊ | ॠ |

+ सवर्णस्वरः

SCERT TELANGANA

२. अधः दत्तानि पदानि पृथक्कृत्य सन्धिनियमं सूचयन्तु।

1. सुरारिः = ............................... =
2. हिमालयः = ............................... =
3. कवीश्वरः = ............................... =
4. श्रीशः = ............................... =
5. विष्णूदयः = ............................... =
6. वधूहः = ............................... =

३. सन्धिं कृत्वा सन्धिनियमं सूचयन्तु।

1. दया + अर्णवः = ............................ =
2. क्षिति + ईशः = ............................ =
3. गिरि + इन्द्रः = ............................ =
4. साधु + उपदेशः = ............................ =
5. चमू + ऊर्जः = ............................ =
6. होतृ + ऋकारः = ............................ =

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. लोके अरण्यानि, पक्षिणः, वृक्षाः न भवन्ति चेत् अस्माकं नित्यजीवनं कथं भवेत् इति ऊहित्वा एकां कथां वदन्तु/लिखन्तु।

## ७. परियोजनाकार्यम्



अ. विविधपक्षिणां, विविधमृगाणां, विविधवृक्षाणां च चित्राणि सङ्कलयन्तु।

SCERT TELANGANA

## ८. प्रशंसा



(एका कवयित्री - किमपि लिखन्ती अस्ति। वारं वारम् आकाशं पश्यति चिन्तयति च। तस्याः पुत्री रजिता। सा षष्ठकक्ष्यायां पठति।)

रजिता - किमम्ब! सुदीर्घं किं चिन्तयति?

अम्बा - रजिते! अहम् एकां रचनां करोमि। तत्र वृक्षस्य अन्यत् नाम न स्फुरति। केवलं वृक्षाः इति आन्ध्रभाषायां చెట్లు इति च कतिवारं लिखामि? वृक्षस्य अन्यनामानि सन्ति चेत् रचना उत्तमा भवेत् खलु!

रजिता - अम्ब! वृक्षस्य महीरुहः, शाखी, विटपी, पादपः, एवं बहूनि नामानि सन्ति।

अम्बा - (आश्चर्येण आनन्देन च) भवती कथं जानाति?

रजिता - संस्कृते अमरकोशे एषः श्लोकः अस्ति।
''वृक्षो महीरुहश्शाखी विटपी पादपस्तरुः।
अनोकहः कुटस्सालः पलाशी द्रुद्रुमागमाः।। इति।

अम्बा - एकः श्लोकः बहुपदानि वदति।
उत्तमा संस्कृतशैली। अहमपि पठामि।

(भवतः कक्ष्यायाम् एतादृशान् श्लोकान् वदन्तं छात्रं कथम् अभिनन्दति ।)



### स्वीयमूल्याङ्कनम्



| | आम् | न | किञ्चित् |
|---|---|---|---|
| अ. श्लोकान् स्पष्टोच्चारणेन पठितुं शक्नोमि। | | | |
| आ. अरण्यं कथं भवतीति वक्तुं शक्नोमि । | | | |
| इ. अरण्यस्य, वृक्षस्य, खगस्य च अन्यनामानि लेखितुं शक्नोमि । | | | |
| ई. सूचनानुसारं कथां लेखितुं शक्नोमि । | | | |




SCERT TELANGANA

द्वितीयभागः

चतुर्थः पाठः

# ४. साहसम्

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।






१. अस्मिन् चित्रे किमस्ति?
२. चित्रं दृष्ट्वा समुचितसन्दर्भं वदन्तु।
३. चित्रस्थौ बालकौ किं प्रदर्शयतः?







भारतसर्वकारः भारतस्य साहसबालेभ्यः राष्ट्रियपुरस्कारान् ददाति। ये बालाः स्वार्थरहितया, त्यागबुध्या विशेषसाहसं प्रदर्शयन्ति तेभ्यः निर्णीतेभ्यः बालेभ्यः एते पुरस्काराः प्रदीयन्ते।

एते पुरस्काराः भारतपुरस्कारः, सञ्जयचोप्रापुरस्कारः, गीताचोप्रापुरस्कारः, गयाधानी पुरस्कारः, राष्ट्रियवीरतापुरस्कार : इति विविधाः सन्ति।

राज्यसर्वकारतः अनुमतानि आवेदनपत्राणि राष्ट्रियस्तरे अनुमन्यन्ते। प्रतिवर्षं बालदिनोत्सवे (नवम्बर् १४ दिनाङ्के) पुरस्कारान् उद्घोषयन्ति। गणतन्त्रदिनोत्सवे (जनवरी २६ दिनाङ्के) बालेभ्यः तान् वितरन्ति।

भारतसर्वकारः वीरतापुरस्कारेण सम्मानितेभ्यः बालकेभ्यः विद्यालयशिक्षणार्थं वित्तसाहाय्यं करोति।

**अध्यापिका** - २०१० तमे वर्षे राष्ट्रियवीरतापुरस्कारेण २३ बालाः सम्मानिताः। तेषु जिस्मी इति बालिका कथं स्ववीरतां प्रदर्शितवती इति श्रावयामि। शृण्वन्तु।

**सर्वे बालाः** - आम्।



पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।





**अध्यापिका** - जिस्मी इति बालिका द्वादशवर्षीया। एषा पेरिञ्चेरी इति ग्रामे निवसति। एतस्याः ग्रामः केरलराज्यस्य त्रिचूर् जनपदे अस्ति।

जिस्मी, चेर्पू इति ग्रामे सर्वकारीये उच्चतरमाध्यमिकविद्यालये सप्तमकक्ष्यायां पठति। २००९ वर्षे डिसम्बर २० तमे दिनाङ्के सा जले कूर्दितवती। पुरस्कारस्वीकरणसमये सा एवम् उक्तवती।

''वस्त्रप्रक्षालनार्थम् अहं तडागं गतवती। तत्र द्वयोः बालयोः रोदनं श्रुतवती। तत् रोदनं मम अनुजयोः रोदनमिव आसीत्। अहं तडागे कूर्दित्वा बहुकष्टेन द्वौ अपि एकस्मिन्नेव समये बहिः आनेतुं प्रयतितवती। यदा मम शक्तिः हीयमाना आसीत् तदा अहम् अनुभूतवती, ''यत् तौ रक्षितुं भगवान् मह्यं शक्तिं यच्छन् अस्ति तयैव शक्त्या अहं द्वावपि रक्षितुं शक्ता अभवम्'' इति।

जिस्मी एकं नववर्षीयं बालकम्, अष्टवर्षीयां बालिकां च रक्षितवती इत्यतः सा गीताचोप्रा राष्ट्रियपुरस्काराय चिता अभवत्।

अतः बालाः ! यः आर्तानां रक्षणं करोति भगवान् तस्य साहाय्यं करोति।

**साहसे श्रीः वसति। धैर्ये साहसे लक्ष्मीः।।**



SCERT TELANGANA




*२०१० तमवर्षस्य साहसबालपुरस्काग्रहीतारः*



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. चित्रं पश्यन्तु। के किं कुर्वन्ति इति वदन्तु।

आ. वीरतापुरस्कारः किमर्थं दीयते?

इ. २०१० तमे वर्षे कियन्तः बालाः वीरतापुरस्कारं प्रप्तवन्तः?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तेषु वाक्येषु सत्यासत्यतां चिह्नीकुर्वन्तु।

१. जिस्मी इति बालिका द्वादशवर्षीया। (सत्यम् / असत्यम्)

२. अध्यापिका वीरतापुरस्कारेण सम्मानिता। (सत्यम् / असत्यम्)

३. जिस्मी सञ्जयचोप्रा पुरस्काराय चिता। (सत्यम् / असत्यम्)

४. जिस्मी द्वौ बालौ रक्षितवती। (सत्यम् / असत्यम्)

५. पेरिञ्चेरी चण्डीघड् समीपे अस्ति। (सत्यम् / असत्यम्)

आ. पाठस्थानि कठिनपदानि “.........” चिह्नेन अङ्कयित्वा उच्चैः पठन्तु। पदकोशस्य/ अध्यापकस्य साहाय्येन अर्थान् जानन्तु।

इ. सर्वकारः, पुरस्कारः इत्येतादृशानि पदानि उच्चैः पठन्तु। तेषाम् अधः रेखाङ्कनं कुर्वन्तु।

ई. पाठे केषाञ्चन पदानाम् अन्ते “ति” “त्” अस्ति। तानि चित्वा लिखन्तु।

## ३. लेखनं, स्वीयरचना



अ. पठन्तु, लिखन्तु

१. पुरस्काराः कतिविधाः सन्ति?
२. जिस्मी इति बालिका कं पुरस्कारं प्राप्तवती?
३. जिस्मी तडागे किमर्थं कूर्दितवती?
४. वीरतापुरस्कारान् कदा वितरन्ति?



आ. चिन्तयन्तु, लिखन्तु

१. नवम्बर् १४ दिनाङ्कस्य वैशिष्ट्यं लिखन्तु?
२. वीरतापुरस्कारस्य चयनप्रक्रिया का?
३. केरलराज्यस्य विषये पञ्चवाक्यानि लिखन्तु?

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



अ. ‘पुरस्कार’ इति पदयुक्तान् शब्दान् लिखन्तु।
आ. अस्मिन् पाठे दत्तान् अकारान्तपुल्लिङ्गशब्दान् लिखन्तु।
इ. एतानि पदानि उपयुज्य स्वीयवाक्यानि लिखन्तु।

१. पुरस्कारः  २. निस्स्वार्थम्  ३. साहाय्यम्

ई. सङ्ख्याः।

**१. सङ्ख्यायाः लेखने उच्चारणे च किञ्चित् वैशिष्ट्यम् अस्ति।**

७२ इति सङ्ख्यायाः उच्चारणं ‘द्विसप्ततिः’ इति।

अत्र ‘२’ सङ्ख्या प्रथमस्थाने अस्ति। सप्तसङ्ख्या दशमस्थाने अस्ति। गणिते तत् ७०+२ इति क्रमेण लिखामः। प्रथमस्थाने विद्यमानः अङ्कः पूर्वम् उच्चरणीयः। दशमस्थाने विद्यमानः च अनन्तरम् उच्चरणीयः।

SCERT TELANGANA

२. **एवमेव शतस्थानिकस्य, ततः परं सहस्रस्थानिकस्य उच्चारणं करणीयम्।**

१९४७ इति सङ्ख्यायाः उच्चारणं - सप्त-चत्वारिंशत्-उत्तर-नव-दशशतम्।

३. **भवतां/भवतीनां जन्मवर्षं लिखित्वा संस्कृतेन उच्चरन्तु।**

४. **एताः सङ्ख्याः संस्कृतेन वदन्तु, लिखन्तु च।**

1. १८९२ - ..........................................
2. १९९९ - ..........................................
3. २०१२ - ..........................................
4. २००० - ..........................................
5. १९९८ - ..........................................
6. २००२ - ..........................................

## ५. व्याकरणांशाः



### अ. अधः दत्तानि वाक्यानि अवगच्छन्तु।

**आरोग्यं सम्यक् नास्ति।** एतत् **कारणसूचकवाक्यम्।**

**चिकित्सालयं गच्छामि।** एतत् **कार्यसूचकवाक्यम्।**

☞ यदा कारणसूचकवाक्यं पूर्वम् उक्त्वा, कार्यसूचकवाक्यम् अनन्तरम् उच्यते तदा कार्यसूचकवाक्यस्य अग्रे 'अतः' इति अव्ययं योजनीयम्।

**उदा॥** १. आरोग्यं सम्यक् नास्ति। **अतः** चिकित्सालयं गच्छामि।

२. विद्युत् नास्ति। **अतः** दण्डदीपः न ज्वलति।

३. शैत्यम् अधिकम् अस्ति। **अतः** बहिः न आगच्छामि।

### आ. 'अतः' इति अव्ययम् उपयुज्य वाक्यानि निर्मान्तु।

| | | |
|---|---|---|
| अ. यानं शीघ्रं प्राप्तम्। | | १. इदं न क्रीणामि। |
| आ. सः चतुरः चित्रकारः | | २. जनाः स्वेदकं धरन्ति। |
| इ. ते सत्यवादिनः | अतः | ३. शीघ्रम् आगतः |
| ई. बहुशैत्यं भवति | | ३. सम्यक् चित्रं लिखति। |
| उ. मूल्यम् अधिकमस्ति | | ५. सदा सत्यं वदन्ति। |

एवमेव 'अतः' उपयुज्य अन्यानि वाक्यानि स्वयं रचयन्तु।

SCERT TELANGANA

## इ. अधः दत्तानि वाक्यानि अवगच्छन्तु।

**चिकित्सालयं गच्छामि।** एतत् **कार्यसूचकवाक्यम्।**

**आरोग्यं सम्यक् नास्ति।** एतत् **कारणसूचकवाक्यम्।**

☞ कार्यसूचकवाक्यं पूर्वम् उक्त्वा कारणसूचकवाक्यम् अनन्तरम् उच्यते चेत् तस्य कारणसूचकवाक्यस्य पूर्वं ''यतः'' इति अव्ययं योजनीयम्।

उदा।। १. चिकित्सालयं गच्छामि **यतः** आरोग्यं सम्यक् नास्ति।

२. दण्डदीपः न ज्वलति **यतः** विद्युत् नास्ति।

३. बहिः न आगच्छामि **यतः** शैत्यम् अधिकम् अस्ति।

## ई. 'यतः' इति अव्ययम् उपयुज्य वाक्यानि रचयन्तु।

| | | |
|---|---|---|
| अ. अद्य वार्तापत्रिका नागता। | | १. ह्यः पर्वदिनम् आसीत् ! |
| आ. गृहपाठं न लिखितवती। | | २. टिप्पण्याः चौर्यम् अभवत्। |
| इ. भवन्तम् इतः पूर्वं न दृष्टवान्। | यतः | ३. भवान् इदानीमेव दृश्यते। |
| ई. तत् वस्त्रं मास्तु। | | ४. तस्य मूल्यमधिकम्। |
| उ. अहं संस्कृतमेव पठामि। | | ५. संस्कृतं सरलम्। |

एवमेव 'यतः' उपयुज्य अन्यानि वाक्यानि स्वयं रचयन्तु।

## ६. सर्जनात्मकव्यक्तीकरणम्



### अ. एतां घटनां स्वजीवने सम्भूतामिव ऊहित्वा लिखन्तु।

### आ. चित्रं दृष्ट्वा कथां लिखन्तु।



SCERT TELANGANA

## ७. परियोजनाकार्यम्



अ. प्रान्तीयदिनपत्रिकासु प्रतिदिनं साहसबालानां कथाः प्रकाश्यन्ते। ताः सङ्गृह्य आनयन्तु।

आ. एकां कथां संस्कृतेन अनूद्य आनयन्तु।

## ८. प्रशंसा



एकः विद्यार्थी विद्यालयतः गृहं गच्छन् आसीत्। सः प्रतिदिनं रेलयानलोहपट्टिकाः अतिक्रम्य गृहं गच्छति। एकस्मिन् दिने सः भग्नां लोहपट्टिकां दृष्टवान्। रेलयानं यदि ततः गच्छति तर्हि भयङ्करः विध्वंसः सम्भवतीति चिन्तितवान्। स्वाङ्गुलीं शिलाखण्डेन भञ्जयित्वा स्वकरवस्त्रं रक्तमयं कृत्वा तत् प्रदर्शयन् रेलयानं स्थगितवान्। सर्वे तं प्रशंसितवन्तः।

(तत्र यदि भवान् / भवती स्यात् तर्हि किं करोति?)



### स्वीयमूल्याङ्कनम्



| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. पाठस्य सारांशं स्वीयवाक्यैः वक्तुं शक्नोमि। | | | |
| ३. वीरतापुरस्कारस्य विषये पञ्चवाक्यानि लेखितुं शक्नोमि। | | | |
| ४. चित्रं दृष्ट्वा कथां लेखितुं शक्नोमि । | | | |




SCERT TELANGANA

द्वितीयभागः

पञ्चमः पाठः

# ५. कार्यदक्षता

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रे के के सन्ति? किं कुर्वन्ति?
२. तदनन्तरं किमभवत् इति वदन्तु?
३. रामाय के के कीदृशं साहाय्यं कृतवन्तः?



**पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।**

१. **स च सर्वान् समानीय वानरान् वानरर्षभः।**
**दिशः प्रस्थापयामास दिदृक्षुः जनकात्मजाम्।।**

భావః – శ్రీరాముడు సుగ్రీవుణ్ణి కిష్కింధరాజ్యానికి రాజుగా చేసిన తరువాత వానరరాజైన సుగ్రీవుడు తన సైనికులైన వానరులను సీతను వెతకడానికై అన్ని దిక్కులకు పంపాడు.



२. **ततो गृध्रस्य वचनात् सम्पातेः हनुमान् बली।**
**शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवम्।।**

భావః– తరువాత జటాయువు అనే గ్రద్దకు అన్న అయిన సంపాతి చెప్పిన సమాచారంతో సీత లంకలో ఉన్నట్లు తెలిసింది. అంతట బలవంతుడగు హనుమంతుడు నూరు ఆమడల (800మైళ్ళు) వెడల్పు గల ఉప్పునీళ్ళ సముద్రాన్ని దాటాడు.



३. **तत्र लङ्कां समासाद्य पुरीं रावणपालिताम्।**
**ददर्श सीतां ध्यायन्तीम् अशोकवनिकां गताम्।।**

భావః– హనుమంతుడు సముద్రాన్ని దాటి అక్కడ రావణుడు పరిపాలిస్తున్న లంకానగరంలో ప్రవేశించి అశోకవనంలో, ఎప్పుడూ "రామనామాన్నే" స్మరిస్తూ ఉన్న సీతాదేవిని చూశాడు.

SCERT TELANGANA

४.	निवेदयित्वाऽभिज्ञानं प्रवृत्तिं च निवेद्य च।
समाश्वास्य च वैदेहीं मर्दयामास तोरणम्॥



భావః- ఆంజనేయుడు శ్రీరాముడిచ్చిన ఉంగరాన్ని సీతాదేవికిచ్చి, రామలక్ష్మణుల కుశలవార్తలను తెలిపి, ఆమెను ధైర్యవచనాలతో ఓదార్చి, తరువాత ఆ అశోకవనం వాకిలిని (తోరణాన్ని) విరగగొట్టాడు.



५.	पञ्चसेनाग्रगान् हत्वा सप्तमन्त्रिसुतानपि।
शूरमक्षञ्च निष्पिष्य ग्रहणं समुपागमत्॥

భావః- ఆంజనేయుడు తనను ఎదిరించడానికి వచ్చిన ఐదుగురు సేనాపతులను, ఏడుగురు మంత్రి కుమారులను, శూరుడగు అక్షుడను రావణుని పుత్రుని చంపి, చివరకు రావణుని మరియొక కుమారుడైన ఇంద్రజిత్తు ప్రయోగించిన బ్రహ్మాస్త్రానికి పట్టుబడ్డాడు.

६.	अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात्।
मर्दयन् राक्षसान् वीरो यन्त्रिणस्तान् यदृच्छया॥

భావః- పూర్వం బ్రహ్మదేవుడు ఇచ్చిన వరప్రభావం వల్ల ఆంజనేయుడు బ్రహ్మాస్త్రప్రభావం నుంచి తను విముక్తుడయ్యాడని తెలుసుకొని తనను త్రాడుతో కట్టి లాగుతున్న రాక్షసులను మర్దించి, కొట్టి చంపాడు.

७.	ततो दग्ध्वा पुरीं लङ्कामृते सीतां च मैथिलीम्।
रामाय प्रियमाख्यातुं पुनरायान्महाकपिः॥

భావః- హనుమంతుడు సీతను, ఆమె ఉన్న ప్రదేశాన్ని తప్ప మిగిలిన లంకనంతా కాల్చాడు. తరువాత సీత జాడను తెలుసుకొన్న సంతోషవార్తను శ్రీరామునికి వివరించడానికై సముద్రాన్ని దాటి రాముని వద్దకు వచ్చాడు.



SCERT TELANGANA



८. सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम्।
न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः॥

భావః – ఆ ఆంజనేయుడు మహాత్ముడైన రామునికి భక్తితో ప్రదక్షిణం చేసి "చూశాను సీతను" అని సంక్షిప్తంగా అతనికి తెలిపాడు.

९. ततः सुग्रीवसहितो गत्वा तीरं महोदधेः।
समुद्रं क्षोभयामास शरैरादित्यसन्निभैः॥

భావః– ఆ తర్వాత రాముడు సుగ్రీవసహితుడై రావణునితో యుద్ధానికి బయలుదేరాడు. సముద్రుడున్నచోటికి చేరి లంకకు వెళ్ళడానికి దారి చూపమని కోరాడు. మార్గమీయకుండుటచే కోపించి సూర్యుని వంటి తేజోవంతములైన బాణాలతో సముద్రాన్ని కల్లోల పరిచాడు.

१०. दर्शयामास चात्मानं समुद्रः सरितां पतिः।
समुद्रवचनाच्चैव नलं सेतुमकारयत्॥

భావః– నదీపతి అయిన సముద్రుడు అట్టి రాముని కోపానికి బెదిరి రాముని ఎదుట నిలిచాడు. ఆ సముద్రుని మాట మేరకు రాముడు నలుడను వానరశ్రేష్ఠునిచే సముద్రంపై సేతువు నిర్మింపజేసాడు.






SCERT TELANGANA



११. तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे।
रामस्सीतामनुप्राप्य परां व्रीडामुपागमत्॥

భావః- ఆ వారిధిపై సముద్రాన్ని దాటి రాముడు లంకను జేరి యుద్ధంలో రావణుణ్ణి సంహరించాడు. సీతను సమీపించి 'చిరకాలం పరునింట నున్న ఈమె నెలా స్వీకరించగలను' అని ఎంతో సిగ్గుపడ్డాడు.

१२. तामुवाच ततो रामः परुषं जनसंसदि।
अमृष्यमाणा सा सीता विवेश ज्वलनं सती॥

భావః- అంత ఆ రాముడు దేవాదులందరు చూస్తుండగా 'నీవు నేత్రరోగికి దీపం వలె ప్రతికూలురాలవు' అని పరుషంగా మాట్లాడాడు. పతివ్రత అయిన సీత తన భర్త పలికిన కఠోరవాక్కులు సహింపలేక అగ్ని ప్రవేశం చేసింది.

१३. ततोऽग्निवचनात् सीतां ज्ञात्वा विगतकल्मषाम्।
बभौ रामः सम्प्रहृष्टः पूजितः सर्वदैवतैः॥

భావః- ఆ విధంగా సీత అగ్ని ప్రవేశం చేసిన తర్వాత అగ్నిమాటచే సీత ఏ దోషమూ లేనిదని తెలిసికొన్న రాముడెంతో సంతోషించాడు. సర్వదేవతలు అతని ధర్మనిరతిని ప్రశంసించారు.

१४. देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान्।
अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्वृतः॥

భావః- యుద్ధంలో విజయాన్ని చూసి ప్రశంసించడానికి వచ్చిన దేవతల నుండి వరాన్ని పొంది, దాని ప్రభావంతో మృతులైన వానరులను నిద్ర నుండి మేల్కొన్నవాళ్ళలా సజీవులుగా చేసి రావణుని అధీనంలో ఉన్న కుబేరుని పుష్పకవిమానంలో సుగ్రీవ, విభీషణాది మిత్రులతో సహా రాముడు అయోధ్యకు బయలుదేరాడు.

SCERT TELANGANA



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. पाठ्यांशचित्रे किं किमस्ति?

आ. भवान् कदापि कमपि सन्तोषितवान् वा? कथम्?

इ. हनुमान् कीदृशं कार्यं कृतवान्? किमर्थम्?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. श्लोकानां भावान् पठन्तु।

आ. अधः दत्तानि पदानि पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु। पदकोशं दृष्ट्वा तेषाम् अर्थान् जानन्तु।

| | | |
|---|---|---|
| वानरर्षभ | समासाद्य | अभिज्ञानम् |
| हत्वा | शतयोजनविस्तीर्णं | लङ्काम् |
| अशोकवनिका | दग्ध्वा | महात्मानम् |
| क्षोभयामास | सेतुम् | सम्प्रहृष्टः |
| सुहृद्वृतः | अयोध्याम् | अमृष्यमाणा |

इ. अधः दत्तानि भावबोधकानि संस्कृतवाक्यानि पाठात् चित्वा लिखन्तु।

1. నూరు ఆమడల వెడల్పు గల ఉప్పునీళ్ళ సముద్రాన్ని దాటాడు.
2. సముద్రుని మాటలను విని రాముడు నలునిచే సేతువు నిర్మింపజేసాడు.
3. దేవతలచే వరాన్ని పొంది మృతులైన వానరులను నిద్రించినవారివలె మేల్కొల్పాడు.
4. అశోకవనంలో కూర్చుని ఎప్పుడూ రాముడినే స్మరిస్తున్న సీతను చూశాడు.

SCERT TELANGANA

### ई. अर्थानुसारं योजयन्तु।

| अ | आ |
|---|---|
| १. लङ्का | अ. इन्द्रजित् |
| २. वानरर्षभः | आ. आञ्जनेयः |
| ३. हनुमान् | इ. सीता |
| ४. वैदेही | ई. रावणपट्टणम् |
| ५. रावणपुत्रः | उ. सुग्रीवः |

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. किष्किन्धायाः राजा कः?

२. वानरर्षभः कः?

३. सुग्रीवः किमर्थं वानरान् दिशः प्रस्थापयामास?

४. लवणार्णवस्य विस्तीर्णं कियत्?

५. सीता कीदृशी?

६. हनुमान् लङ्कां किं कृतवान्?



### आ. चिन्तयन्तु, लिखन्तु

१. एतस्मिन् रामायणे भवतः अभीष्टं पात्रं किम्? किमर्थम्?

२. कार्यसाधने विघ्नाः भवन्ति चेत् भवान्/भवती किं करिष्यति?

३. भवान्/भवती अपि आकाशे उड्डयितुं शक्नोति चेत् किं किं करिष्यति?

SCERT TELANGANA

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



**अ. रामायणे वर्णितानां सर्वेषां नामानि लिखन्तु। तेषां नाम्नाम् उपयोगं कृत्वा वाक्यरचनां कुर्वन्तु।**

उदा - सीतायाः पतिः रामः।

**आ. एतानि पदानि उपयुज्य स्वीयवाक्यानि लिखन्तु।**

अ. प्रदक्षिणम्  आ. पुरीम्  इ. महात्मानम्  ई. आहवे

**इ. अत्र प्रणवस्य दिनचर्या लिखिता अस्ति। तत् दृष्ट्वा 'तः-पर्यन्तम्' उपयुज्य वाक्यानि लिखन्तु।**

| समयः | कार्यम् | समयः | कार्यम् |
|---|---|---|---|
| 6.00-7.00 | योगासनम् | 5.00-6.00 | क्रीडा |
| 7.30-8.30 | गृहपाठः | 6.30-8.00 | अध्ययनम् |
| 9.00-4.00 | विद्यालयः | 9.30-5.50 | निद्रा |

उदा - प्रणवः 6.00 वादनतः 7.00 पर्यन्तं योगासनं करोति।

१. प्रणवः........................................ गृहपाठं लिखति।

२. ............................................. विद्यालये पठति।

३. ........................................................ क्रीडति।

४. ............................................. अध्ययनं करोति।

५. ............................................. निद्रां करोति।

## ५. व्याकरणांशाः



**अ. एतेषां वाक्यानाम् आधारेण प्रश्नान् लिखन्तु।**

१. सुग्रीवः सर्वान् वानरान् समानीतवान्।

प्र. ..........................................

२. सुग्रीवः वानरान् दिशः प्रेषितवान्।

प्र. ..........................................

३. जनकात्मजायाः अन्वेषणार्थं वानराः अगच्छन्।

प्र. ..........................................

SCERT TELANGANA

४. हनुमान् सप्तमन्त्रिणः पञ्चसेनाग्रगान् मारितवान्।

५. ..........................................

ऊ. हनुमान् लवणार्णवं पुप्लुवे।

६. ..........................................

## आ. पाठ्यांशे स्थितानि नामवाचकपदानि लिखन्तु।

## इ. अधः दत्तानि विग्रहवाक्यानि अवगच्छन्तु।

| | | | | |
|---|---|---|---|---|
| १. जनकात्मजाम् | - | जनकस्य आत्मजाम् | - | जानकीम् |
| २. वानरर्षभः | - | वानरः ऋषभः इव | - | सुग्रीवः |
| ३. वैदेही | - | विदेहराजस्य अपत्यं स्त्री | - | वैदेही |
| ४. मैथिली | - | मिथिलायाः अपत्यं स्त्री | - | मैथिली |

## ई. तरप्-तमप्

'तरप्-तमप्' प्रत्ययौ अतिशयार्थं सूचयतः। द्वयोः एकस्मिन् अतिशयं दर्शयितुं 'तरप्' प्रत्ययस्य प्रयोगः क्रियते। बहूनाम् एकस्मिन् अतिशयं दर्शयितुं 'तमप्' प्रत्ययस्य प्रयोगः क्रियते। एतौ प्रत्ययौ प्रातिपदिकस्य अन्ते योज्येते।

**१. एतानि उदाहरणानि परिशीलयन्तु।**

अस्माकं प्राङ्गणे उन्नताः वृक्षाः सन्ति। तेषु आम्रतिन्त्रिणीनारिकेलवृक्षाः 'उन्नततमाः'।

1. आम्रतिन्त्रिणीवृक्षयोः तिन्त्रिणी वृक्षः **'उन्नततरः'**।
   (द्वौ स्तः अतः 'तर' प्रयोगः)

2. आम्रतिन्त्रिणीनारिकेलवृक्षेषु नारिकेलवृक्षः **'उन्नततमः'**।
   (त्रयः सन्ति अतः 'तम' प्रयोगः)

**२. पठन्तु, अवगच्छन्तु।**

| प्रातिपदिकम् | तरप्प्रत्ययान्तः | तमप्प्रत्ययान्तः |
|---|---|---|
| उन्नत | उन्नततर | उन्नततम |
| प्राचीन | प्राचीनतर | प्राचीनतम |
| विशाल | विशालतर | विशालतम |
| सुन्दर | सुन्दरतर | सुन्दरतम |
| दीर्घ | दीर्घतर | दीर्घतम |

SCERT TELANGANA

३. उदाहरणानुसारम् आवरणात् उचितं पदं चित्वा रिक्तस्थानानि पूरयन्तु।

उदा - अजगजयोः अजः कृशतरः। (कृशतरः, कृशतमः)

1. पाण्डवेषु युधिष्ठिरः .......................। (गुणवत्तमः, गुणवत्तरः)
2. काकमयूरस्वरयोः काकस्य स्वरः...........। (कर्कशतरः, कर्कशतमः)
3. ग्रहेषु मङ्गलः भूमेः........................। (समीपतरः, समीपतमः)
4. सिंहव्याघ्रचित्रकेषु व्याघ्रः...................। (क्रूरतरः, क्रूरतमः)
5. जनेषु गुणी जनः..........................। (विरलतरः, विरलतमः)

भवन्तः स्वविद्यालये कयोरपि द्वयोः, बहुषु एकस्य वा अतिशयं दर्शयितुं 'तरप्, तमप्' प्रत्यययोः उपयोगं कुर्वन्तु।

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. एतां रामायणकथां कथारूपेण लिखन्तु।

## ७. परियोजनाकार्यम्



अ. वर्तमानकाले समुद्रतरणे उपयुज्यमानानां साधनानां चित्राणि सङ्गृह्य शालायां प्रदर्शयन्तु।

## ८. प्रशंसा



नटराजः - आनन्द ! गतदिने अहं पाठशालां नागच्छम्। मम सोदरी मार्गमध्ये भूमौ अपतत्। तदा भवानेव ताम् उत्थाप्य गृहपर्यन्तम् आनीय त्यक्तवान् इति सोदरी उक्तवती । धन्यवादाः ।

आनन्दः - रामायणे रामसुग्रीवयोः मैत्री इव आवयोः मैत्री। मित्रयोः मध्ये धन्यवादाः किमर्थम्? तत्कार्यम् अहं स्नेहेन कृतवान्।

(भवन्तः अपि परस्परं स्नेहेन कथं व्यवहरन्ति ।)



### स्वीयमूल्याङ्कनम्



| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. श्लोकान् स्पष्टोच्चारणेन पठितुं शक्नोमि । | | | |
| २. पाठस्य भावं स्वीयवाक्यैः वक्तुं शक्नोमि । | | | |
| ३. आञ्जनेयकृतं महत्कार्यम् अधिकृत्य लेखितुं शक्नोमि। | | | |
| ४. पाठं कथारूपेण लेखितुं शक्नोमि । | | | |

SCERT TELANGANA

द्वितीयभागः

षष्ठः पाठः

# ६. तुलसीवृक्षकम्

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।




१. चित्रे कस्याः कण्ठे स्टेतस्कोप् अस्ति?
२. कूपीषु किं किं दृश्यते? तेषाम् उपयोगाः के?
३. चित्रे के के वृक्षाः दृश्यन्ते? तेषाम् उपयोगाः के?



भारतीयाः वृक्षानपि देवभावनया पश्यन्ति। वृक्षेषु तुलसीवृक्षकं प्रधानम्। अस्माकं गृहाणां प्राङ्गणेषु साधारणतया तुलसीवृक्षकं दृश्यते एव। भारतीयाः तुलसीं देवताम् इव सम्भाव्य पूजयन्ति, तुलसीदलैः विष्णुम् अर्चन्ति च। तुलसीदलानां छेदनसमये ते "केशवस्य प्रिये देवि! केशवार्थं लुनामि त्वाम्" इति प्रार्थयन्ते। तुलसीदलैः कृतेन अर्चनेन भगवान् विष्णुः प्रसन्नः भूत्वा अभीष्टानि ददातीति पुराणानि वदन्ति। देवीभागवते तुलसी 'विश्वपावनी' इति नाम्ना वर्णिता अस्ति। तुलसी सर्वमपि पवित्रं करोति इति तस्य अर्थः।

देवस्य तीर्थे तुलसीदलानि मिश्रयन्ति। तादृशस्य प्रसादस्य तीर्थस्य च सेवनेन स्वास्थ्यवृद्धिः भवति।

तुलस्याम् अनेके औषधगुणाः सन्तीति आयुर्वेदज्ञाः प्रतिपादयन्ति। आयुर्वेदग्रन्थेषु तुलस्याः गुणवर्णनपराणि अनेकनामानि सन्ति।

**पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।**

SCERT TELANGANA



तेषु गन्धहारिणी, अमृता, पवित्रपुष्पा, भूतघ्नी इति नामानि प्रसिद्धानि।

प्रतिदिनं भोजनात् पूर्वं तुलसीपत्राणां खादनेन रोगनिरोधकशक्तिः वर्धते। तुलसीकषायस्य सेवनेन चर्मव्याधयः नश्यन्ति। कण्ठवेदनायां, कण्ठस्वरस्य परिवर्तने च तुलसीदलैः मिश्रितं क्वथितं जलं बहु उपकरोति। एवम् इयं तुलसी बहुविधरोगान् निवारयति। अतः अस्याः ''सर्वरोगनिवारिणी'' इति नाम प्रसिद्धम्।

इत्थं सर्वस्यापि पवित्रीकरणे, वातावरणस्य स्वच्छतायाः सम्पादने, रोगाणां निरोधे, कालुष्यस्य निवारणे च तुलस्याः सामर्थ्यम् अनुपमं खलु !



**श्लो।। तुलस्यारोपिता सिक्ता दृष्टा स्पृष्टा च पालिता।**
**आरोपिता प्रयत्नेन चतुर्वर्गफलप्रदा।।**





## एतानि कुर्वन्तु



## १. श्रुण्वन्तु, विचिन्त्य वदन्तु



१. केषाञ्चन वृक्षाणां नामानि वदन्तु?
२. वृक्षाणाम् उपयोगाः के?
३. गृहे तुलस्याः स्थानं कुत्र?
४. स्नानं कृत्वा कं वृक्षकं जलेन सिञ्चन्ति? किमर्थम्?

## २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तानि भावबोधकानि संस्कृतवाक्यानि पाठात् चित्वा लिखन्तु।

1. వృక్షములలో తులసి ముఖ్యమైనది.
2. భారతీయులు తులసిని దేవతగా పూజిస్తారు.
3. తులసీదళములచే పూజించుట వలన భగవంతుడు ప్రసన్నుడవుతాడు.
4. దేవుడి తీర్థంలో తులసిని కలుపుతారు.
5. తులసి యందు ఎన్నో ఔషధగుణాలున్నాయి.

आ. अधः दत्तानि पदानि पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु। पदकोशं दृष्ट्वा अर्थान् जानन्तु।

| | | | |
|---|---|---|---|
| भारतीयाः | देवभावनया | छेदनसमये | लुनामि |
| विश्वपावनी | स्वास्थ्यवृद्धिः | औषधगुणाः | आयुर्वेदज्ञाः |
| गन्धहारिणी | पवित्रपुष्पा | भूतघ्नी | चर्मव्याधयः |
| सर्वरोगनिवारिणी | पवित्रीकरणे | अनुपमम् | |

इ. अधः दत्तेषु भिन्नपदं पृथक् कुर्वन्तु।

१. अ. कृष्णतुलसी आ. तुलसीदलम् इ. तुलसीपत्रम् ई. तुलसीकषायः
२. अ. पवित्रपुष्पा, आ. विश्वपावनी, इ. सर्वरोगनिवारिणी ई. अमृतवल्ली
३. अ. देवभावनया पश्यन्ति, आ. दलैः अर्चन्ति,
इ. औषधरूपेण उपयुञ्जते, ई. तोरणेषु बध्नन्ति।

SCERT TELANGANA

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. प्रत्येकस्मिन् गृहे विद्यमानं वृक्षकं किम्?

२. तुलसीच्छेदनसमये कं श्लोकं पठन्ति?

३. तुलस्याः अन्यानि नामानि लिखन्तु?

४. तुलसीदलैः किं क्रियते?



### आ. चिन्तयन्तु, लिखन्तु

१. तुलस्याः उपयोगः कुत्र भवति?

२. तुलसी कुत्र कुत्र उपयुज्यते?

३. पाठस्य सारांशं स्ववाक्यैः लिखन्तु।

४. तुलस्याः विषये भारतीयानां विश्वासः कः?

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. अधः तुलस्याः नामानि सन्ति। अन्विष्य लिखन्तु।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| स | पा | वि | प | वि | त्र | पु | ष्पा |
| र्व | र्प | वि | श्व | पा | व | नी | घ्री |
| अ | तु | प | मं | रि | * | त | * |
| न | स | ग | हा | ग | भू | क | अ |
| * | ग | न्ध | हा | रि | णी | त | मृ |
| * | ग | प | वि | रा | ख | लु | ता |
| स | र्व | रो | ग | नि | वा | रि | णी |

उदा।। विश्वपावनी

१.......................

२.......................

३.......................

४.......................

५.......................

६.......................

SCERT TELANGANA

## आ. अधः वृक्षस्य वृक्षकस्य च चित्रे दत्ते। तयोः प्रयोजनानि स्वीयवाक्यैः लिखन्तु।



१.

२.

३.

४.

५.



१.

२.

३.

४.

५.

## इ. वाक्यानि पठित्वा समुचितं योजयन्तु।

१. जलेन सेचनं कुर्मः।

२. देवम् अर्चामः।

३. दीपाराधनं कुर्मः।

४. गर्तं कृत्वा रोपयामः।

५. औषधरूपेण खादामः।

६. तीर्थे प्रसादे च मिश्रयामः।

७. कषायं कृत्वा पिबामः।









## ई. अधः दत्तानि पदानि उपयुज्य वाक्यानि लिखन्तु।

अ. तुलसीदलम् आ. रोगनिरोधकशक्तिः इ. चर्मव्याधिः ई. कालुष्यनिवारणम्

SCERT TELANGANA

## ५. व्याकरणांशाः



### अ. गुणसन्धिः

**१. एतानि उदाहरणानि परिशीलयन्तु।**

1. देव + इन्द्रः
   = देव् + अ + इन्द्रः = देवेन्द्रः।  (अ + इ = ए)
2. महा + ईशः
   = मह् + आ + ईशः= महेशः।  (आ + ई = ए)

अ/आ + इ/ई = ए

3. सूर्य + उदयः
   = सूर्य् + अ + उदयः = सूर्योदयः।  (अ + उ = ओ)
4. महा + उत्सवः
   = मह् + आ + उत्सवः = महोत्सवः।  (आ + उ = ओ)

अ/आ +उ/ऊ = ओ

5. सप्त + ऋषयः
   = सप्त् + अ + ऋषयः = सप्तर्षयः।  (अ + ऋ = अर्)
6. महा + ऋषिः
   = मह् + आ + ऋषिः= महर्षिः।  (आ + ऋ = अर्)

अ/आ + ऋ/ॠ = अर्

7. तव + ऌकारः
   = तव् + अ + ऌकारः = तवल्कारः।  (अ + ऌ = अल्)

अ/आ +ऌ = अल्

अ, आ इत्येताभ्यां वर्णाभ्याम् इ, ई इत्येतयोः परयोः एकारः, उ, ऊ इत्येतयोः परयोः ओकारः, ऋ , ॠ इत्येतयोः परयोः अर्, ऌकारे परे अल् च पूर्वपरयोः स्थाने एकादेशः भवति ।

एषः गुणसन्धिः इत्युच्यते ।

| अ/आ + इ/ई | अ/आ + उ/ऊ | अ/आ + ऋ/ ॠ | अ/आ + ऌ |
|---|---|---|---|
| ए | ओ | अर् | अल् |

SCERT TELANGANA

**२. पदच्छेदं कृत्वा सन्धिनियमं सूचयन्तु।**

१. उपेन्द्रः = ................................. =

२. गङ्गोदकम् = ................................. =

३. देवर्षिः = ................................. =

४. हितोपदेशः = ................................. =

५. रमेशः = ................................. =

**३. सन्धिं कृत्वा सन्धिनियमं सूचयन्तु।**

१. उष्ण + उदकम् = ......................... =

२. परम + ऋषयः = ......................... =

३. त्वया + उक्तम् = ......................... =

४. परमात्मा + इव = ......................... =

५. काक + उलूकौ = ......................... =

## ६. सर्जनात्मकव्यक्तीकरणम्



**अ. पाठस्य आधारेण एकं सम्भाषणं लिखन्तु।**

## ७. परियोजनाकार्यम्



**अ. तुलसीसदृशानाम् अन्येषाम् औषधगुणयुक्तानां वृक्षाणां नामानि ज्ञात्वा लिखन्तु।**

**आ. कस्यापि एकस्य वृक्षस्य उपयोगान् लिखन्तु।**

CERT TELANGANA

## ८. प्रशंसा



अध्यापकः - भोः छात्राः ! नूतनशैक्षिकवर्षे सर्वेषां स्वागतम्। ग्रीष्मावकाशेषु केन किम् उत्तमकार्यं कृतम् इति वदन्तु।

वेदवती - श्रीमन् ! ग्रीष्मावकाशेषु अहं बहूनि आम्रफलानि खादितवती। तेषां बीजानि गर्ते स्थापितवती। प्रतिदिनं जलेन सेचनं कृतवती। पञ्चदिनानन्तरम् अङ्कुराः उत्पन्नाः। इदानीम् एकपादमितवृक्षाः विंशतिः अभवन्।

अध्यापकः - अत्युत्तमं कार्यम्। "**वृक्षो रक्षति रक्षितः**"। भवती अभिनन्दनार्हा। (सर्वे वेदवतीं प्रशंसन्ति।)

**(भवन्तः ग्रीष्मावकाशे किम् उत्तमकार्यं कृतवन्तः?)**



### स्वीयमूल्याङ्कनम्



| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. दत्तानि भावयुक्तवाक्यानि पाठे अन्वेष्टुं शक्नोमि । | | | |
| ३. तुलस्याः उपयोगान् लेखितुं शक्नोमि । | | | |
| ४. पाठस्य आधारेण सम्भाषणं लेखितुं शक्नोमि । | | | |




SCERT TELANGANA

पठन्तु - नन्दन्तु

# चिन्तनस्य विषयः तु...



कश्चन गुरुः शिष्यः च अश्वम् आरुह्य गच्छन्तौ आस्ताम्। रात्रिः अभवत्। कस्मिंश्चित् वने तौ वासं कृतवन्तौ। गुरुः उक्तवान् - ''अहं निद्रां करोमि। अश्वः वृक्षे बद्धः अस्ति। भवान् तं रक्षतु'' इति। ''निद्रानिवारणार्थं मया किं करणीयम्?'' इति पृष्टवान् शिष्यः।

''किमपि चिन्तयन् भवतु भवान्। तदा निद्रा न बाधते '' इति उक्तवान् गुरुः। शिष्यः एतत् अङ्गीकृतवान्। किञ्चित्कालानन्तरं जागरणं प्राप्य गुरुः पृष्टवान् - ''शिष्य ! किम् अधिकृत्य चिन्तयन् अस्ति भवान्?'' इति।

''नक्षत्राणि स्वयमेव उत्पन्नानि, उत तानि गगने केनचित् स्थापितानि इति चिन्तयन् अस्मि '' इति अवदत् शिष्यः।

गुरुः पुनरपि निद्रामग्नः जातः। द्वित्रघण्टानन्तरं तेन जागरणं प्राप्तम्। सः शिष्यम् अपृच्छत् - ''किं चिन्तयन् अस्ति भवान्?'' इति।

''समुद्रजलं स्वयमेव लवणमयं जातम्, उत कोऽपि समुद्रे लवणं योजितवान् इति चिन्तयन् अस्मि'' इति उक्तवान् शिष्यः। गुरुः तृप्त्या पुनः निद्राम् अकरोत्।

उषःकालः जातः। शिष्यः जागृतः एव आसीत्। ''इदानीं किं चिन्त्यते भवता?'' इति अपृच्छत् गुरुः।

''गुरुवर्य ! वृक्षे बद्धः अश्वः न दृश्यते। सः स्वयमेव बन्धनात् मुक्तः जातः, उत कोऽपि तम् उन्मोच्य नीतवान् स्यात् इति चिन्तयन् अस्मि '' इति अवदत् शिष्यः।

शिष्यस्य अविवेकं दृष्ट्वा हसनीयम् उत विषादः प्रकटनीयः इति अजानन् गुरुः मौनम् आश्रितवान्।

SCERT TELANGANA

तृतीयभागः

सप्तमः पाठः

# ७. लोकसेवनम्

**चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।**



१. चित्रे के सन्ति? ते किं कुर्वन्ति?
२. ईदृशं दृश्यं भवान् कदापि दृष्टवान् वा?
३. सामाजिकविपत्तिषु कीदृशं साहाय्यं कर्तुं शक्यते?



पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।

जीवनस्य लक्ष्यमेव लोकसेवनव्रतम्।
सेवया हि जीवनं सार्थकं फलान्वितम् ।। जीवनस्य।।

अन्धकारजीवने दीपमुद्दीपयाम
क्लेशबहुलवीथिकाकण्टकान्युत्खनाम
त्रस्तदीनबान्धवान् हस्तलम्बमुन्नयाम
न्यूनता यत्र यत्र तत्र सत्वरं हि याम ।। जीवनस्य।।



SCERT TELANGANA



प्रतिजनं प्रतिदिनं ध्येयमारोपयाम
श्रद्धया विशुद्धया दीनदेवमर्चयाम
स्वार्थभावनां विना सर्वमपि समर्पयाम
जनहितं वरप्रदं हृदि चिरं स्थापयाम ।। जीवनस्य।।



लोकसेवनं ध्रुवं दैवसमाराधनम्
दीनबन्धुसेवनान्नास्ति परं पुण्यदम्
कार्यतत्परा वयं साधयाम दिग्जयम्
वर्धतां समेधताम् ऋद्धिमद्धि भारतम् ।। जीवनस्य।।

\- श्री जनार्दन हेग्डे



SCERT TELANGANA



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. गीतं गायन्तु।

आ. दीनजनसेवनं किमर्थं करणीयम्?

इ. दीनजनान् सेवितवताम् उत्तमपुरुषाणां नामानि वदन्तु ।

ई. भवन्तः दीनजनानां साहाय्यं कर्तुम् इच्छन्ति चेत् कथं कर्तुम् इच्छन्ति?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. पठन्तु, अवगच्छन्तु

జీవితానికి లక్ష్యం లోకానికి సేవ చేయడమే. సేవ చేయడం వలన జీవనం సార్థకమౌతుంది. ఫలవంతమౌతుంది.

చీకటితో నిండిన జీవితంలో దీపం వెలిగిద్దాం. ఎన్నో దుఃఖాలతోనున్న మార్గంలోని ముళ్ళను ఏరివేద్దాం. బాధలోనున్న దీనజనులకు సహాయహస్తాన్నందిద్దాం. ఎక్కడ లోపం ఉన్నా సవరించడానికి అక్కడికి త్వరగా వెళ్దాం.

ప్రతిరోజు ప్రతిఒక్కరికి ధ్యేయాన్ని గుర్తు చేద్దాం. శ్రద్ధతో స్వచ్ఛమైన మనస్సుతో దీనజనులలోనున్న దేవుని పూజిద్దాం. స్వార్థాన్ని వదలి సర్వస్వం సమర్పిద్దాం. చిరకాలం, జనులకు మంచి చేయడమే వరమని మనస్సుల్లో నిలుపుకుందాం.

జనులకు సేవచేయడమే దేవుని పూజించడం. ఇది సత్యం. దీనజనులకు సేవచేయడాన్ని మించిన పుణ్యం మరొకటి లేదు. కార్యతత్పరులమైన మనం విజయాన్ని సాధిద్దాం. తెలివితో వృద్ధి చెందుదాం. భారతదేశాన్ని ప్రగతిబాటలో నడిపిద్దాం.

आ. गीतस्य भावं वदन्तु।

इ. अधः दत्तानि पदानि गीते अन्विष्य तेषामधः रेखाङ्कनं कुर्वन्तु। पदकोशं दृष्ट्वा तेषाम् अर्थान् जानन्तु।

| | | | |
|---|---|---|---|
| सार्थकम् | हृदि | ऋद्धि | लोकसेवनम् |
| श्रद्धया | उद्दीपयाम | न्यूनता | वरप्रदम् |
| पुण्यदम् | सत्वरम् | जनहितम् | लक्ष्यमेव |

SCERT TELANGANA

### ई. अधः दत्तानि वाक्यानि पठन्तु। तत्समानार्थकवाक्यानि पाठे अन्विष्य लिखन्तु।

1. దీనజనులకు సేవచేయడాన్ని మించిన పుణ్యం మరొకటి లేదు.
2. స్వార్థాన్ని వదలి సర్వస్వం సమర్పిద్దాం.
3. సేవచేయడం వలన జీవనం సార్థకమవుతుంది.
4. అనేకకష్టాల వీథిలో నుంచి ముళ్ళను ఏరివేద్దాం.

### उ. 'म्' 'म' इत्यक्षरान्तानि पदानि पाठे अन्विष्य अधः लिखन्तु।

| उदा - | व्रतम् | उद्दीपयाम |
|---|---|---|
| | अ ................. | अ ................. |
| | आ ................. | आ ................. |
| | इ ................. | इ ................. |
| | ई ................. | ई ................. |
| | उ ................. | उ ................. |

### ६. मञ्जूषातः समुचितपदानि चित्वा रिक्तस्थानानि पूरयन्तु।

हृदि, सत्वरं, ध्येयम्, दीनदेवम्, दीपम्

१. प्रतिजनं प्रतिदिनं................. आरोपयाम।
२. अन्धकारजीवने................. उद्दीपयाम।
३. जनहितं वरप्रदं................. चिरं स्थापयाम।
४. न्यूनता यत्र यत्र तत्र ................. हि याम।
५. श्रद्धया विशुद्धया................. अर्चयाम।

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. अस्माकं जीवनलक्ष्यं किम्?
२. किं कुर्मः चेत् जीवनं सार्थकं भवति?
३. प्रतिजनं हृदि कीदृशं ध्येयं स्थापनीयम्?
४. लोकसेवनं कीदृशम्?
५. लोकसेवनार्थं किं करणीयम्?
६. कीदृशं जीवनम् आदर्शमयं भवति?

SCERT TELANGANA



### अ. चिन्तयन्तु, लिखन्तु

१. भवतः चिन्तनानुगुणं सप्त सेवाकार्याणि लिखतु।

२. भवान्/भवती कदापि कस्यचित् साहाय्यं कृतवान्/कृतवती चेत् लिखतु।

३. एतस्य पाठस्य पठनानन्तरं कीदृशं साहाय्यं कर्तुम् इच्छति इति लिखतु।

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. अत्र 'हितम्' 'सेवनम्' इति पदद्वयम् अस्ति। एकैकं पदं नूतनपदस्य अन्ते योजयित्वा नूतनपदानि रचयन्तु। तानि वाक्येषु लिखन्तु।

हितम् उदा - **जनहितम्**  सेवनम् उदा - **गुरुसेवनम्**

### आ. अधः दत्तानि पदानि उपयुज्य स्वीयवाक्यानि लिखन्तु।

| | | |
|---|---|---|
| अ. सार्थकम् | आ. सत्वरम् | इ. चिरम् |
| ई. साधयाम | उ. श्रद्धया | ऊ. न्यूनता |
| ऋ ध्येयम् | ए. प्रतिदिनम् | ऐ. लोकसेवा |

### इ. पाठे दृष्टानि अनुस्वारान्तपदानि अन्विष्य अधः लिखन्तु।

| | | | | | |
|---|---|---|---|---|---|
| व | र | प्र | दं | स | कं |
| लो | धृ | वं | स | र्थ | ज |
| प | क | त्व | सा | प्र | न |
| चि | रं | से | यं | ति | हि |
| जी | व | नं | व | ज | तं |
| नं | प्र | ति | दि | नं | व |

**उदा - सार्थकम्**

१.....................

२.....................

३.....................

४.....................

५.....................

६.....................

७.....................

८.....................

९.....................

१०.....................

SCERT TELANGANA

## ५. व्याकरणांशाः



अ. अधः दत्तानि लोट्-उत्तमपुरुषरूपाणि दत्तम् उदाहरणम् अनुसृत्य लिखन्तु।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| उदा- | उद्दीपयानि | उद्दीपयाव | उद्दीपयाम |
| | साधयानि | ............ | ............. |
| | ............. | समर्पयाव | ........... |
| | ............. | ............. | अर्चयाम |
| | आरोपयानि | ............. | ............. |
| | ............. | स्थपयाव | ............. |
| | उन्नयानि | ............. | ............. |

आ. उपरि दत्तानि धातुरूपाणि उपयुज्य वचनत्रये वाक्यानि लिखन्तु।

| | | |
|---|---|---|
| उदा - अहं दीपम् उद्दीपयानि | आवां दीपम् उद्दीपयाव | वयं दीपम् उद्दीपयाम |
| १. अहं दिग्जयं साधयानि | ....................... | ....................... |
| २. अहं सर्वमपि............ | ....................... | ....................... |
| ३. अहं दीनदेवं............ | ....................... | ....................... |
| ४. अहं ध्येयं ........... | ....................... | ....................... |
| ५. अहं कण्टकान्............ | ....................... | ....................... |
| ६. अहं हृदि चिरं............ | ....................... | ....................... |
| ७. अहं हस्तलम्बं............ | ....................... | ....................... |

SCERT TELANGANA

## इ. अधः दत्तानि रेखाङ्कितपदानि अवगच्छन्तु। (विना -द्वितीया)

१. जलं <u>विना</u> मत्स्यः न जीवति ।

२. प्राणवायुं <u>विना</u> मनुष्यः न जीवति ।

३. सूर्यं <u>विना</u> जनजीवनं न भवति ।

४. इन्धनतैलं <u>विना</u> वाहनं न चलति ।

५. वृक्षान् <u>विना</u> शुद्धवायुः नास्ति ।

☞ अत्र <u>विना</u> योजनेन द्वितीयाविभक्तिः भवति।

## ई. अधः दत्तानां पदानां साहाय्येन 'विना' इति अव्ययम् उपयुज्य वाक्यानि लिखन्तु।

१. माता, पुत्रः ..............................

२. चन्द्रः, औषधम् ..............................

३. जलं, जीवनम् ..............................

४. सुखं, दुःखम् ..............................

५. लवणं, खाद्यम् ..............................

६. अभ्यासः, शास्त्रम् ..............................

## उ. एतानि वाक्यानि अवगच्छन्तु।

१. **यदा** मेघः गर्जति **तदा** वृष्टिः भवति।

२. **यदा** कर्षकः बीजं वपति **तदा** सस्यम् उद्भवति।

३. **यदा** वृष्टिः भवति तदा कर्षकः बीजं वपति।

४. **यदा** सस्यवृद्धिः भवति **तदा** कर्षकः सस्यं कर्तयति।

५. **यदा** धान्यं विक्रीणाति **तदा** धनम् प्राप्नोति।

६. **यदा** धनं पश्यति **तदा** कर्षकस्य मुखे आनन्दः भवति।



SCERT TELANGANA

ऊ. यदा-तदा इति अव्यये उपयुज्य आवरणस्थानां पदानां साहाय्येन वाक्यनिर्माणं कुर्वन्तु।

| | | |
|---|---|---|
| १. | अधिकाङ्क्षाः कदा प्राप्यन्ते? | (परिश्रमः) |
| २. | भोजनं रुचिकरं कदा भवति? | (लवणम्) |
| ३. | प्रकाशः कदा भवति? | (सूर्यः उदेति) |
| ४. | उद्योगं कदा प्राप्नोति? | (परीक्षाम् उत्तरति) |
| ५. | उत्तमनागरिकः कदा भवति? | (समाजसेवां करोति) |

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. महेशः स्वीयजन्मदिनसन्दर्भे मधुरं वितरीतुम् एकम् अनाथाश्रमं गच्छति। तत्र भानुः नाम बालकः रुदन् दृश्यते। महेशः तस्मै मधुरं यच्छति। तस्मिन् सन्दर्भे प्रचलितं तयोः सम्भाषणम् ऊहित्वा लिखन्तु।



SCERT TELANGANA

## ७. परियोजनाकार्यम्



अ. महनीयानां (समाजसेवकानां) नामानि सङ्कलन्तु। तेषाम् उत्तमानि कार्याणि भित्तिपत्रिकायां लिखित्वा आनयन्तु।

## ८. प्रशंसा



रविः - सीते! किमर्थं स्ववस्त्राणि स्यूते स्थापयति? ग्रामान्तरं गच्छति किम्?

सीता - न। एतानि वस्त्राणि लघूनि अभवन्। धर्तुं न शक्यन्ते।

रविः - परन्तु एतानि नूतनानि इव दृश्यन्ते।

सीता - अतः एव पार्श्ववीथ्यां निर्धनेभ्यः दातुं गच्छन्ती अस्मि।

रविः - बहु उत्तमम्। मम वस्त्राण्यपि तेभ्यः दातुम् इच्छामि। तिष्ठतु, अहमपि आगच्छामि।

सीता - उत्तमम्।

(प्रियबालाः भवन्तः एतादृशानि वस्त्राणि किं कुर्वन्ति?)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. गीतं सरागभावं गातुं शक्नोमि । | | | |
| २. लोकसेवनार्थं किं करणीयमिति वक्तुं शक्नोमि। | | | |
| ३. सप्तसेवाकार्याणि लेखितुं शक्नोमि । | | | |
| ४. सूचनानुसारं सम्भाषणं लेखितुं शक्नोमि। | | | |




SCERT TELANGANA

अष्टमः पाठः

# ८. नाडीजङ्घः

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रं दृष्ट्वा कथां वदन्तु?
२. कृषकः केन भावेन सर्पं रक्षति?
३. सर्पः किं न स्मरति?

पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।

एकस्मिन् गहनारण्ये कस्मिँश्चित् वटवृक्षे नाडीजङ्घः नाम गृध्रः प्रतिवसति स्म। सः सकलगुणसम्पन्नः दैवभक्तश्च। सः प्रतिदिनं भक्त्या विधातारम् अर्चति स्म।

एकदा सः यथाविधि विधातारं पूजयित्वा सायं समये स्वनिवासम् आगच्छत्। तत्र वटवृक्षमूले सः एकम् अपरिचितं युवकम् अपश्यत्। सः युवकः क्षतगात्रः, अत्यन्तं परिश्रान्तः इव च दृश्यते स्म। तादृशं युवकं दृष्ट्वा नाडीजङ्घस्य हृदयम् आर्द्रम् अभवत्। सः तं युवकम् इत्थम् अपृच्छत् - ''भवान् कः? भवतः ईदृशी स्थितिः कथम् अभवत्? मम नाम नाडीजङ्घः, एषः मम निवासः। भवान् अत्र निर्भयं तिष्ठतु'' इत्युक्त्वा नाडीजङ्घः स्वपक्षाभ्यां तस्य श्रमम् अपनीय खादितुं कानिचन फलान्यपि तस्मै अयच्छत्।

सः युवकः सदैन्यं ''हे श्रेष्ठ! भवतः आतिथ्येन मम श्रमः अपगतः। भवतः आत्मीयभाषणं मम सर्वं श्रमम् अपनीय धैर्यम् अदात्। मम नाम गौतमः। अहं निर्धनः। धनार्जनार्थम् अहं केनचित् वणिक्समूहेन सह ग्रामान्तरं गच्छामि स्म। अरण्यमार्गे एकः उन्मत्तः गजः अस्माकं समूहम् आक्रम्य बहून् अमारयत्। अहं तु स्वल्पाघातैः ततः आत्मानं रक्षन् पलायनं कृत्वा अत्र आगच्छम्। यत्र कुत्रापि किञ्चित् धनलाभः भवति चेत् मम जीवनं सुखमयं भवेत् इति चिन्तयामि'' इत्यवोचत्।



SCERT TELANGANA



तस्य दीनालापं श्रुत्वा नाडीजङ्घः - ''मित्र ! दैन्यं त्यजतु। मम स्नेहितः विरूपाक्षः नाम राक्षसराजः समीपस्थस्य राज्यस्य मधुव्रजस्य महाराजः अस्ति। प्रातः तस्य समीपं गत्वा आत्मानः परिचयं कृत्वा मम नाम वदतु। भवतः कार्यसिद्धिः अवश्यमेव भविष्यति '' इति तस्मै युवकाय आश्वासनम् अयच्छत्।

वस्तुतः गौतमः ब्राह्मणः। परन्तु नीचस्वभावः। सः मधुमांसादिकं भक्षयन् भ्रष्टाचारी भूत्वा किरातकैस्सह सञ्चरन् प्रमादवशात् नाडीजङ्घस्य समीपम् आगच्छत्।

अनन्तरदिने गौतमः प्रातः उत्थाय नाडीजङ्घस्य सूचनानुसारं मधुव्रजराज्यं गत्वा विरूपाक्षं स्वदैन्यवृत्तान्तं न्यवेदयत्। सः महाराजः मित्रस्य नाडीजङ्घस्य वचने विश्वस्य गौतमाय भारवहनमितं धनं, सुवर्णं च अयच्छत्।

धनसुवर्णलाभेन नितरां सन्तुष्टः गौतमः सायङ्काले नाडीजङ्घम् उपागच्छत्। सः नाडीजङ्घं सर्वं वृत्तान्तं निवेद्य रात्रौ तत्रैव निद्राणवान्। मध्यरात्रे उत्थाय गौतमः ततः प्रस्थानं करणीयम् इति निश्चयं कृत्वा 'पाथेयार्थं किं नयामि' इति अचिन्तयत्। तस्य दृष्टिः नाडीजङ्घे अपतत्। सः कृतघ्नः गौतमः कृतोपकारं विस्मृत्य नाडीजङ्घं निर्दयं हत्वा तस्य मांसं गृहीत्वा ततः निरगच्छत्।

बहुदिनेभ्यः स्वसमीपम् अनागतं स्वमित्रं नाडीजङ्घं चिन्तयन् विरूपाक्षः तस्य अन्वेषणार्थं स्वपुत्रं प्रैषयत्।

SCERT TELANGANA

ज्ञातवृत्तान्तः तस्य पुत्रः गौतमं बद्ध्वा स्वपितृसमीपम् अनयत्। क्रुद्धः सः राक्षसराजः ''एतं कृतघ्नं गौतमं खण्डखण्डशः कृत्वा काकेभ्यः क्षिपन्तु इति समाज्ञापयत्।





विरूपाक्षः स्वमित्रस्य नाडीजङ्घस्य अन्तिमसंस्कारम् आरब्धवान्। तत् द्रष्टुं देवाः अपि तत्र उपस्थिताः आसन्। तदानीं कामधेनोः क्षीरस्य बिन्दवः नाडीजङ्घस्य चितौ अपतन्। कामधेनोः क्षीरस्य प्रभावेण नाडीजङ्घः पुनरुज्जीवितः।



नाडीजङ्घः देवान् कामधेनुं च नत्वा 'कृतघ्नं गौतमम् अभाग्यं' मत्वा तमपि पुनर्जीवयन्तु इति देवान् प्रार्थयत्। देवाः अपि तस्य निःस्वार्थवचनैः सन्तुष्टाः भूत्वा गौतमं पुनर्जीवितम् अकुर्वन्।



अपकारिणः अपि उपकारं कृतवान् नाडीजङ्घः धन्यः खलु?

**श्लो।। उपकारिषु यस्साधुः साधुत्वे तस्य को गुणः।**

**अपकारिषु यस्साधुः स साधुस्सद्भिरुच्यते।।**



SCERT TELANGANA



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



१. कथां स्वीयवाक्यैः वदन्तु।
२. कथायां कति पात्राणि सन्ति?
३. पाठे किं पात्रं भवान् अधिकम् इच्छति? किमर्थम्?
४. कथायां प्रधानांशः कः?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तानि वाक्यानि कथानुक्रमेण लिखन्तु।

१. मधुव्रजराज्यं गत्वा विरूपाक्षं स्वदैन्यवृत्तान्तं न्यवेदयत्।
२. नाडीजङ्घं निर्दयं हत्वा, मांसं गृहीत्वा गतवान्।
३. किञ्चित् धनलाभः भवति चेत् मम जीवनं सुखमयं भवेत्।
४. कृतघ्नं गौतमम् अभाग्यं मत्वा तमपि पुनरुज्जीवयन्तु।
५. तस्य दृष्टिः नाडीजङ्घे अपतत्।
६. कामधेनोः क्षीरस्य प्रभावेण नाडीजङ्घः पुनरुज्जीवितः।

आ. अधः दत्तानां वाक्यानां भावबोधकानि संस्कृतवाक्यानि पाठात् चित्त्वा लिखन्तु।

1. దట్టమైన అడవిలో
2. ఓదార్పు
3. గాయాలతో కూడిన శరీరము కలవాడు
4. మోయగలిగినంత
5. ప్రయాణం నడుమ కావలసిన ఆహారము.
6. దయనీయమైన మాటలు
7. తన రెక్కలతో
8. స్వార్థం లేని మాటలతో
9. తక్కువ గాయాలతో
10. ద్రవించుట/ కరిగిపోవుట

SCERT TELANGANA

### इ. अधः दत्तानि वाक्यानि 'कः' 'कं' प्रति उक्तवान् इति सूचयतु।

| | कः | कं प्रति |
|---|---|---|
| १. भवतः कार्यसिद्धिः अवश्यमेव भविष्यति। | ............. | ............. |
| २. भवतः आतिथ्येन मम श्रमः अपगतः। | ............. | ............. |
| ३. खण्डखण्डशः कृत्वा काकेभ्यः क्षिपन्तु। | ............. | ............. |
| ४. पाथेयार्थं किं नयामि? | ............. | ............. |
| ५. अस्माकं समूहम् आक्रम्य बहून् अमारयत्। | ............. | ............. |

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. अस्मिन् पाठे स्नेहितौ कौ?

२. गौतमेन कृतम् अकार्यं किम्?

३. नाडीजङ्घः गौतमाय कीदृशम् उपकारं कृतवान्?

४. कीदृशं युवकं दृष्ट्वा नाडीजङ्घस्य हृदयम् आर्द्रम् अभवत्?

५. विरूपाक्षः गौतमं किम् अकरोत्?

६ नाडीजङ्घः देवतां किं प्रार्थयत्?

७. नाडीजङ्घः गौतमाय कीदृशम् आश्वासम् अयच्छत्?



### आ. चिन्तयन्तु, लिखन्तु

१. विरूपाक्षः किमर्थं गौतमाय दण्डनं दत्तवान्?

२. नाडीजङ्घः किमर्थं गौतमस्य पुनर्जीवनं प्रति देवान् प्रार्थयत्?

३. परेभ्यः स्वयं कृतम् उपकारमुद्दिश्य लिखन्तु।

४. नाडीजङ्घः कीदृशः?

५. नाडीजङ्घविरूपाक्षयोः मैत्री कीदृशी?

६. गौतम-नाडीजङ्घयोः कीदृशः भेदः अस्ति?

SCERT TELANGANA

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



अ. पाठे दृष्टानि 'पूजयित्वा', 'अपनीय', इत्येतादृशपदानि उपयुज्य नूतनवाक्यानि वदन्तु, लिखन्तु।

आ. पाठस्थानि दशवाक्यानि परस्परं वदन्तः उक्तलेखनं कुर्वन्तु।

इ. , - । - " " - ! एतानि चिह्नानि उपयुज्य अधः दत्तानि वाक्यानि पुनः लिखन्तु।

मोहनः षष्ठकक्ष्याम् उत्तीर्णः अभवत्। सः सन्तोषेण गृहम् आगत्य अम्ब अहम् उत्तीर्णः अभवम् रात्रौ चलनचित्रमन्दिरं गत्वा चित्रं पश्यामि अनुमतिं तथा धनं च ददातु इति उक्तवान्।

ई. उदाहरणानुसारं पदानि परिवर्त्य लिखन्तु।

**उदा - अर्चति - अर्चनं करोति।**

१. वसति - ................
२. हसति - ................
३. धावति - ................
४. क्रीडति - ................
५. पिबति - ................

**उदा - अपृच्छत् - प्रच्छनम् अकरोत्।**

१. अगच्छत् - ................
२. अहसत् - ................
३. अधावत् - ................
४. अक्रीडत् - ................
५. अपिबत् - ................

उ. अधः दत्तानि पदानि उपयुज्य स्वीयवाक्यानि लिखन्तु।

१. आत्मीयभाषणम् २. ग्रामान्तरम् ३. दीनालापम्
४. बहुदिनेभ्यः ५. यथाविधि ६. सुखमयम्

SCERT TELANGANA

## ५. व्याकरणांशाः



**अ. एतानि तृतीयाविभक्तिरूपाणि उदाहरणानुसारं लिखन्तु। तेषाम् अर्थान् अवगच्छन्तु।**

| | | | |
|---|---|---|---|
| **उदा -** | **समूहः -** | **समूहेन** | **समूहैः** |
| १. | आघातः - | ..................... | ..................... |
| २. | लाभः - | ..................... | ..................... |
| ३. | वचनम् - | ..................... | ..................... |
| ४. | निर्धनः - | ..................... | ..................... |
| ५. | किरातकः - | ..................... | ..................... |
| ६. | प्रभावः - | ..................... | ..................... |
| ७. | भक्तः - | ..................... | ..................... |
| ८. | कृतघ्नः - | ..................... | ..................... |

**आ. उदाहरणवाक्येषु रेखाङ्कितानि पदानि पठन्तु। अध्यापकस्य साहाय्येन अवगच्छन्तु।**

**उदा -** १. किञ्चित् कारणम् अस्ति।
कानिचित् कारणानि सन्ति

२. कश्चन बालकः धावति।
केचन बालकाः धावन्ति।

३. काचन महिला आगच्छति।
काश्चन महिलाः आगच्छन्ति।

**इ. समुचितानि पदानि चित्वा समुचितपट्टिकायाम् योजयन्तु।**

कथा, भिन्नानि, मधुरफलम्, गुणाः, भक्ताः, चित्राणि, कक्ष्या, पुत्राः, चित्रम्, कक्ष्याः, लता, मालाः, वस्त्रम्, युवकाः, भिन्नम्, युवकः, वस्त्राणि, माला, गुणाः, मधुरफलानि, भक्ताः, लताः, कथा, पुत्रः

| किञ्चित् | कानिचित् |
|---|---|
| | |

कश्चन केचन

काचन काश्चन

## ई. ऋकारान्तशब्दाः

केशवः सप्तमकक्ष्यायां पठति। केशवस्य गृहे तस्य पिता, माता, भ्राता, च सन्ति। तस्य भ्राता पञ्चमकक्ष्यायां पठति। तस्य पिता ग्रामस्य नेता च। केशवः प्रतिदिनं मातरं पितरं च नमति। भ्रातरं नीत्वा शालां गच्छति। भ्रात्रा सह खेलति। मात्रा सह आपणं गच्छति। पित्रा सह भोजनं करोति। सः भ्रात्रे स्वक्रीडनकानि ददाति। मात्रे औषधं ददाति। पित्रे स्वगृहकार्यं दर्शयति।

## उ. एतेषु वाक्येषु पिता माता, भ्राता, इत्येतानि पदानि सन्ति। तेषां सम्बद्धानि क्रमेण अत्र लिखन्तु।

माता, पिता, भ्राता

........... ........... ...........

........... ........... ........... एतानि ऋकारान्तशब्दरूपाणि।

........... ........... ...........

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. एतां कथां सम्भाषणरूपेण लिखन्तु।

SCERT TELANGANA

## ७. परियोजनाकार्यम्



एषा कथा महाभारते अस्ति। महाभारतात् एतादृशीं मानवीयकथाम् एकां सङ्कलय्य आनयन्तु।

## ८. प्रशंसा



गणेशः - ललिते ! भवती किमर्थं भव्यायै फलं दत्तवती।

ललिता - सा भोजनार्थं किमपि न आनीतवती।

गणेशः - किन्तु ह्यः सा भवतीं निन्दितवती किल !

ललिता - सा मम सखी। तस्यै फलं ददामि चेत् का हानिः? अहं तस्याः निन्दावचनं तदा एव विस्मृतवती।

**(भवान् / भवती एवम् अपकारिणां कृते उपकारं कृतवन्तं छात्रं कथम् अभिनन्दति?)**





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठस्य कथां स्वीयवाक्यैः वक्तुं शक्नोमि । | | | |
| २. कठिनपदानि वाक्येषु प्रयोक्तुं शक्नोमि । | | | |
| ३. नाडीजङ्घस्य स्वभावं लेखितुं शक्नोमि । | | | |
| ४. एतां कथां सम्भाषणरूपेण लेखितुं शक्नोमि। | | | |




SCERT TELANGANA

तृतीयभागः

नवमः पाठः

# ९. भगवद्गीता

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।




१. चित्रे किं किं दृश्यते?

२. बालकः किं करोति?

३. भवान् कदापि स्पर्धासु भागं स्वीकृतवान् वा? कदा? कस्मिन् विषये?

**पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।**

(विजयः सप्तमकक्ष्याछात्रः। सः एकस्मिन् दिने विद्यालयस्य सूचनाफलके सूचनां पठति।)

विजयः - आचार्य ! नमस्कारः।

गुरुः - आयुष्मान् भव। आगच्छतु। उपविशतु।

विजयः - आचार्य! विद्यालयस्य सूचनाफलके वक्तृत्वस्पर्धाविषये सूचनां पठितवान्।

गुरुः - सत्यम्। व्यक्तित्वनिर्माणम् इति विषये भगवद्गीताश्लोकानाम् आधारेण वक्तृत्वस्पर्धा अस्ति।

विजयः - भवतः साहाय्येन अहं स्पर्धायां भागं ग्रहीतुम् इच्छामि।



गुरुः - अस्तु। अहं श्लोकान्, तेषां भावं च वदामि। अभ्यासं कृत्वा स्पर्धायां विजयं प्राप्नोतु।

विजयः - अस्तु ! आचार्य! वदन्तु।

गुरुः - **अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।**<br>**निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥ १॥**<br>**सन्तुष्टस्सततं योगी यतात्मा दृढनिश्चयः।**<br>**मय्यर्पितमनोबुद्धिः यो मद्भक्तः स मे प्रियः॥ २॥**

ఏ ప్రాణియందూ ద్వేషభావం లేనివాడు, సర్వప్రాణుల యందు, స్నేహం, దయ కలవాడు, మమకారం, అహంకారం లేనివాడు, సుఖ దుఃఖాలను సమానంగా అనుభవించేవాడు, క్షమాగుణం కలవాడు, అన్ని వేళలా సంతోషంతో ఉండువాడు, యోగి, నిగ్రహం కలవాడు, స్థిరమైన నిశ్చయం కలవాడు, మనస్సును, బుద్ధిని నా యందే నిలిపిన వాడు అయిన భక్తుడు నాకు ప్రియుడు.



**यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।**<br>**हर्षामर्षभयोद्वेगैः मुक्तो यस्स च मे प्रियः॥ ३॥**

ఎవరికీ ఉద్వేగం కలిగింపనివాడు, ఎవరి వల్లనూ తాను ఉద్వేగం పొందనివాడు, ఆనందం, ద్వేషం, భయం, చంచలం మున్నగు వికారాలు లేనివాడు నాకు ప్రియుడు.

SCERT TELANGANA



समश्शत्रौ च मित्रे च तथा मानावमानयोः।
शीतोष्णसुखदुःखेषु समस्सङ्गविवर्जितः ॥ ४॥
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।
अनिकेतः स्थिरमतिः भक्तिमान् मे प्रियो नरः॥ ५॥

శత్రువుల పట్ల, మిత్రుల పట్ల సమానమైన దృష్టి కలవాడు, మానావమానాలను, శీతోష్ణాలను, సుఖదుఃఖాలను ఒకే భావంతో చూసేవాడు, యెవరితోనూ ఎక్కువ అనుబంధం లేనివాడు, దొరికినదానితో తృప్తి చెందేవాడు, లౌకికమైన కోరికలు లేనివాడు. మౌనియై స్థిరనివాసం లేక (నిత్యము పర్యటిస్తూ) నిశ్చలచిత్తం గల భక్తుడు నాకు ప్రియుడు.

SCERT TELANGANA

आयुस्सत्वबलारोग्य-सुखप्रीतिविवर्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या आहारास्सात्त्विकप्रियाः॥ ६॥



ఆయువు, సత్వం, బలం, ఆరోగ్యం, సుఖం, ప్రీతి వీటిని పెంపొందించు రసపదార్థాలు, పాలు, చక్కెర, వెన్న, నెయ్యి మొదలగు స్నిగ్ధపదార్థాలు, ఓజస్సును పెంపొందించే స్థిరపదార్థాలు, సాత్వికభావాన్ని పెంచే హృద్యపదార్థాలు సాత్త్వికులకు ఇష్టం.



कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टाः दुःखशोकामयप्रदाः॥ ७॥

కారం, పులుపు, ఉప్పు రుచులు, మిక్కిలి వేడివైనవి, మాడినపదార్థాలు, దాహం కలిగించునవి, అలాగే దుఃఖం, చింత, రోగాలను కలిగించు ఆహారపదార్థాలు రాజసస్వభావం గలవారికి ఇష్టం.



**यातयामं गतरसं पूतिपर्युषितं च यत्।**
**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्।। ८।।**

ఒక జాము క్రితం వండినవి, సారహీనమైనవి, చెడువాసనగలవి, పాసిపోయినవి, ఎంగిలియైనవి, అపవిత్రమైనవి అయిన పదార్థాలు తామసులకు ఇష్టం.

ईदृशश्लोकाः भगवद्गीतायां बहवः सन्ति। एतान् कण्ठस्थीकृत्य वक्तृत्वस्पर्धायाः सिद्धतां करोतु।
विजयः - धन्यवादः आचार्य!
गुरुः - विजयी भव।



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. प्रथमचित्रे कः अस्ति? सः किं करोति?
आ. श्लोकानां भावं स्वीयवाक्यैः वदन्तु।
इ. आहारः कति विधः?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. श्लोकान् गायन्तु।
आ. श्लोकानां भावान् पठन्तु।
इ. भवतः/भवत्याः भोजनं पाठानुसारेण कस्मिन् विभागे अन्तर्भवति इति वदन्तु।
ई. भवान् / भवती वक्तृत्वस्पर्धायां 'भागं' गृहीतवान् /गृहीतवती चेत् स्वानुभवं स्वीयवाक्यैः वदन्तु।

SCERT TELANGANA

उ. पाठस्य सारांशं स्वीयवाक्यैः वदन्तु।

ऊ. अधः दत्तानि पदानि पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु। पदकोशं दृष्ट्वा अर्थान् जानन्तु।

| | | | |
|---|---|---|---|
| आयुष्मान् भव | वक्तृत्वस्पर्धा | भगवद्गीता | सुखदुःखयोः |
| मानावमानयोः | अनिकेतः | स्थिरमतिः | भक्तिमान् |
| सुखप्रीतिविवर्धनाः | स्निग्धाः | अद्वेष्टा | क्षमी |
| दृढनिश्चयः | मय्यर्पितमनोबुद्धिः | उच्छिष्टम् | तामसः |
| राजसः | सात्त्विकः | | |

ऋ. अधः दत्तानि वाक्यनि शुद्धीकुर्वन्तु।

१. गुरुः वक्तृत्वस्पर्धायां भागं गृह्णाति।

२. विजयः रामायणश्लोकानाम् आधारेण स्पर्धायां भागं गृह्णाति।

३. निर्दयः मे प्रियः।

४. यातयामं, गतरसं...... राजसप्रियाः।

५. कट्वम्ललवणपदार्थाः......सात्त्विकप्रियाः।

## ३. लेखनं, स्वीयरचना



अ. पठन्तु, लिखन्तु

१. सम्भाषणं कयोः मध्ये प्रचलति?

२. विजयः सूचनाफलके कां सूचनां पठितवान्?

३. सात्त्विकाहारः कः?

४. राजसस्य इष्टः आहारः कः?

५. कीदृशं भोजनं तामसप्रियम्?



आ. चिन्तयन्तु, लिखन्तु

अ. भगवतः कीदृशः भक्तः प्रियः?

आ. त्रिविधः आहारः कः?

इ. विजयस्य भाषणं स्वीयवाक्यैः लिखन्तु?

SCERT TELANGANA

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



**अ. पाठेऽस्मिन् अद्वेष्टा, मैत्रः, इत्येतादृशानि गुणवाचकपदानि सन्ति। तानि सङ्गृह्य लिखन्तु।**

**आ. उदाहरणं दृष्ट्वा उचितं योजयन्तु।**

1. అపవిత్రమైన పదార్థములు.
2. ఆయువును పెంచు పదార్థములు
3. రోగములను కలిగించు పదార్థములు.
4. నెయ్యిలాంటి స్నిగ్ధపదార్థములు.
5. ఎంగిలి పదార్థములు.
6. పాసిపోయిన పదార్థములు.
7. మిక్కిలి వేడిపదార్థములు.
8. ఓజస్సును పెంచు పదార్థములు.
9. దాహము కలిగించు పదార్థములు.

**सात्त्विकाहारः**

**राजसाहारः**

**तामसाहारः**

**इ. अधः दत्तानि पदानि उपयुज्य स्वीयवाक्यानि लिखन्तु।**

अ. निरहङ्कारः  आ. दृढनिश्चयः  इ. सुखदुःखेषु  ई. भगवद्गीताम्

## ५. व्याकरणांशाः



**अ. अत्र कानिचन क्रियारूपाणि दत्तानि। तेषां मध्ये भेदः कः इति, कथं तेषां परिवर्तनं भवतीति जानन्तु।**

| | | | | | | |
|---|---|---|---|---|---|---|
| भवति | - | भूत्वा | - | सम् +भूय | = | सम्भूय |
| धावति | - | धावित्वा | - | उप +धाव्य | = | उपधाव्य |
| लिखति | - | लिखित्वा | - | वि +लिख्य | = | विलिख्य |

☞ भूत्वा, धावित्वा, लेखित्वा एतादृशानि क्त्वाप्रत्ययान्तानि असमापकक्रियारूपाणि। सम्भूय, उपधाव्य, विलिख्य एतादृशानि ल्यप्प्रत्ययान्तानि असमापकक्रियारूपाणि।

आ. अधः दत्तानां क्रियापदानां क्त्वाप्रत्ययान्त - ल्यप्प्रत्ययान्तरूपाणि च लिखन्तु।

| | | | |
|---|---|---|---|
| १. तिष्ठति | २. उत्तिष्ठति | ३. गच्छति | ४. आगच्छति |
| ५. नयति | ६. आनयति | ७. स्मरति | ८. विस्मरति |
| ९. क्रीणाति | १०. विक्रीणाति | ११. त्यजति | १२. परित्यजति |
| १३. स्थापयति | १४. संस्थापयति | १५. गृह्णाति | १६. संगृह्णाति |

इ. अत्र दत्तानि वाक्यानि अवगच्छन्तु।

१. अर्चकः - यः आलये अर्चनं करोति सः

२. अध्यापकः - यः पाठम् अध्यापयति सः

३. वृद्धः - यः अशीतिवर्षीयः सः

४. वार्तापत्रिका - या पत्रिका वार्ताः प्रकाशयति सा

५. घटी - या समयं दर्शयति सा

६. नर्तकी - या नर्तनं करोति सा

७. गृहम् - यत् निवसितुं योग्यं तत्

८. वस्त्रम् - यत् शरीरम् आच्छादयति तत्

ई. अधः दत्तैः पदैः सह यः-सः, या-सा, यत्-तत् संयोज्य उपरि दत्तानाम् उदाहरणानाम् अनुसारं वाक्यनिर्माणं कुर्वन्तु।

| | | |
|---|---|---|
| अ. रक्षकः | आ. क्रीडाकारः | इ. विद्यार्थी |
| ई. धनिका | उ. गायिका | ६. गृहिणी |
| ७. वाहनम् | ८. सङ्गणकम् | ९. विमानम् |

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. पाठे प्रथमपञ्चश्लोकेषु कः प्रियः नरः इति व्यक्तीकृतम् अस्ति। भवन्तः/भवत्यः कः अप्रियः नरः इति दशवाक्यैः लिखन्तु।

SCERT TELANGANA

## ७. परियोजनाकार्यम्



अ. भगवद्गीतायां कति अध्यायाः सन्ति? कस्मिन् अध्याये कति श्लोकाः सन्ति इति अन्विष्य सङ्गृह्णन्तु, तेषां सूचीं कुर्वन्तु।

आ. तेषु व्यक्तित्वनिर्माणसम्बद्धश्लोकान् सङ्गृह्णन्तु।

इ. पाठगतान् श्लोकान् भगवद्गीतायाम् अन्विष्यन्तु।

## ८. प्रशंसा



एकः देशरक्षायां निमग्नः सैनिकः पितरं प्रति पत्रं लिखितवान्। हे जनक ! भवान् बाल्ये मां भगवद्गीतायाः श्लोकान् पाठयित्वा उत्तमव्यक्तित्वनिर्माणे प्रोत्साहनं कृतवान्। मयि वीरतां च पूरितवान्। तेन बलेन एव अहं देशस्य सौनिकपदवीं चितवान्। एतत् मम गर्वकारणम्। मम एका प्रार्थना अस्ति। मम पुत्राय अपि भगवद्गीतायाः सारं बोधयित्वा तम् उत्तमपौरं करोतु। जय हिन्द्।

**(देशरक्षणे सैनिकानां योगदानम् अधिकृत्य वदन्तु ।)**





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. श्लोकान् स्पष्टोच्चारणेन पठितुं शक्नोमि । | | | |
| २. श्लोकानां भावं स्वीयवाक्यैः वक्तुं शक्नोमि। | | | |
| ३. कठिनपदानि वाक्येषु प्रयोक्तुं शक्नोमि । | | | |
| ४. भगवतः कीदृशः भक्तः प्रियः इति लेखितुं शक्नोमि। | | | |




SCERT TELANGANA

तृतीयभागः

दशमः पाठः

# १०. जलसंरक्षणम्

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रेऽस्मिन् महिले किं कुरुतः?

२. अत्र जलस्थानानि कानि कानि सन्ति?

३. जलं कति प्रकारैः उपयोक्तुं शक्यते?



**पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।**

भूमिः, जलम्, अग्निः, वायुः. आकाशः इत्येतानि पञ्चभूतानि प्राकृतिकसंसाधनानि। एतानि सर्वेषां प्राणिनां जीवनाधाराः भवन्ति। एतेषु जलं बहु प्रधानं भवति। उदकं विना जीवनम् असाध्यमेव। द्रवाहाररूपेण, औषधरूपेण, शौचसाधनरूपेण, अन्नोत्पादनाय च पानीयम् अस्माकं दैनन्दिनजीवने अत्यन्तावश्यकं भवति। विद्युतः उत्पादनाय च जलम् उपयुक्तं भवति। कृषिकार्यार्थमपि नीरस्य आवश्यकता नितराम् अस्ति। उक्तं च -

**श्लो।। प्राणिमात्रेण लोकेऽस्मिन् प्राणत्वेनावधार्यते।**
**जलं सर्वोपयोगित्वाज्जीवनं तृप्तिदं स्मृतम्।।**

निर्मलं जलम् अमृतसमानम्। अतः तत् औषधरूपेण उपयुक्तं भवति। तेन स्वास्थ्यसंरक्षणं भवति। परन्तु आधुनिके काले औद्योगीकरणस्य कारणतः अधिकाधिकं कलुषितजलमेव उपलभ्यते। कर्मागारेभ्यः

SCERT TELANGANA

निर्गच्छद्भिः विषरसायनैः, तीर्थस्थानेषु शवदहनादिसंस्कारैः, प्रवाहस्थलीषु पशुवाहनवस्त्रप्रक्षालनैः, मलमूत्रादिविसर्जनेन च जलं कलुषितं जायते। अनेन कलुषितजलपानेन जनाः रोगैः पीडिताः भवन्ति।

अतः प्राचीनाः बहून् जलसंरक्षणोपायान् अवदन्। लोकहिताय, जनजीवनाय च उपयुक्तं जलं संरक्षितुं नियमान् च अकुर्वन्।




१. अलसत्वेन, निर्लक्ष्येन च जलं न व्यर्थीकर्तव्यम्।
२. कूपतटाकनदीजलानि मलिनानि न करणीयानि।
३. जलेषु व्यर्थपदार्थाः न प्रक्षेपणीयाः।
४. सर्वकारपक्षतः जलप्रदूषणनियन्त्रणम्।
५. सामाजिकसंस्थाभिः जलविषये जागरूकतावर्धककार्यक्रमाः आयोजनीयाः।
६. व्यर्थजलानां शुद्धीकरणम्।
७. जलस्य मितोपयोगविषये प्रजासु जागृतिः कल्पनीया।
८. वृक्षान् संरोप्य वर्षार्थम् उपयुक्तं वातावरणं निर्मातव्यम्।

**एतान् नियमान् आचरन्तः जलसंरक्षणं कुर्वन्तः**
**तेन आरोग्यम् आनन्दं च साधयामः।**





## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. चित्रे किं किम् अस्ति?

आ. भवद्भ्यः पेयजलं कथं लभ्यते?

ई. भवतां गृहे जलं केनोपायेन स्वच्छं क्रियते?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तानि पदानि पाठे अन्विष्य तेषाम् अधः रेखाङ्कनं कुर्वन्तु। पदकोशं दृष्ट्वा तेषाम् अर्थान् जानन्तु।

| | | | |
|---|---|---|---|
| जीवनाधाराः | मुख्यभूमिकाम् | अत्यन्तावश्यकम् | कृषिकार्यार्थम्, |
| औषधरूपेण | स्वास्थ्यरक्षणम् | जनजीवनाय | जलप्रदूषणम्, |
| करणीयः | साधयामः | | |

आ. अधः दत्तानि वाक्यानि पठन्तु। तत्समानार्थकवाक्यानि पाठे अन्विष्य लिखन्तु।

1. నీరు లేకపోతే జీవించడం కష్టం.
2. స్వచ్ఛమైన జలం ఔషధంలా ఉపయోగపడుతుంది.
3. మురికినీటి వలన అనారోగ్యం కలుగుతుంది.
4. నీటిలో వ్యర్థపదార్థాలు వేయకూడదు.
5. నీటిని పొదుపుగా వాడాలి.

इ. एतेषु पदेषु विरुद्धं पदं ज्ञात्वा तस्य अधः रेखाङ्कनं कुर्वन्तु।

| | | | |
|---|---|---|---|
| १. औषधम् | तीर्थस्थानम् | कर्मागारः | प्रवाहजलम् |
| २. वस्त्रप्रक्षालनम् | स्नानम् | संरक्षणम् | कृषिः |
| ३. व्यर्थपदार्थाः | रसायनानि | दहनसंस्कारः | कलुषितजलम् |
| ४. द्रवाहारः | अन्नोत्पादनम् | वृष्टिः | शौचसाधनम् |

### ३. लेखनं, स्वीयरचना



अ. पठन्तु, लिखन्तु

१. कैः प्रकारैः जलं कलुषितं भवति?

२. जलस्य प्राथमिकोपयोगाः के?

३. जलस्य संरक्षणं कथं करणीयम्?

SCERT TELANGANA



**आ. चिन्तयन्तु, लिखन्तु**

१. जलेन विना नित्यजीवने कानि कार्याणि कर्तुं न शक्नुयाम? तेषां पट्टिकां लिखन्तु।

२. जलं केषु सन्दर्भेषु व्यर्थं भवति?

३. कालुष्यजलेन काः हानयः भवन्ति?

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



**अ. 'जलम्' इति पदस्य पर्यायपदानि लिखन्तु।**

**आ. औषधम् इति पदेन सम्बद्धानि पदानि लिखन्तु। तानि उपयुज्य लघुवाक्यानि निर्मान्तु।**

**इ. अधः दत्तानि पदानि उपयुज्य स्वीयवाक्यानि लिखन्तु।**

१. आवश्यकता २. कारणतः ३. अधुनिके काले ४. नितराम्

५. जीवनाधाराः ६. शुद्धीकरणम् ७. द्रवाहारः

**आ. रेखाङ्कितपदानां व्यतिरेकार्थकपदानि लिखन्तु। तैः व्यतिरेकपदैः समुचितवाक्यानि निर्मान्तु।**

१. जलेन सह वायुः अपि <u>आवश्यकः</u> भवति।

२. जलस्य <u>मितः</u> उपयोगः एव करणीयः।

३. आतपे जलपानेन शरीरं <u>तृप्तिं</u> प्राप्नोति।

४. वयम् अश्रद्धया जलं <u>व्यर्थं</u> कुर्मः।

## ५. व्याकरणांशाः



**अ. वाक्यानि पठन्तु। रेखाङ्कितपदस्य अर्थम् अवगच्छन्तु।**

१. तत्र रज्जुः सर्पः <u>इव</u> दृश्यते।

२. इदं जलम् अमृतम् <u>इव</u> मधुरम् अस्ति।

३. सूर्यः अग्निः <u>इव</u> तपति।

४. जलं हिमम् <u>इव</u> शीतलम् अस्ति।

**आ. एतानि पदानि 'इव' इति अव्ययेन संयोज्य वाक्यानि लिखन्तु।**

१. चोरः - राक्षसः

२. वाहनम् - विमानम्

३. शुनकः - सिंहः

४. वृद्धः - युवकः

SCERT TELANGANA

## इ. वृद्धिसन्धिः

**१. एतानि उदाहरणानि परिशीलयन्तु।**

1. एक + एकम्
   = एक् + अ + एकम् = एकैकम् । (अ + ए = ऐ )
2. महा + ऐश्वर्यम्
   = मह् + आ + ऐश्वर्यम् = महैश्वर्यम् । ( आ + ऐ = ऐ)

अ/आ + ए/ऐ = ऐ

3. तस्य + ओदनः
   = तस्य् + अ + ओदनः = तस्यौदनः । (अ + ओ = औ )
4. गङ्गा + ओघः
   = गङ्ग् + आ + ओघः । (आ + ओ = औ)

अ/आ + ओ/ औ = ओ

'अ, आ' इत्येताभ्यां वर्णाभ्याम् 'ए, ऐ' इत्येतयोः परयोः 'ऐकारः', 'ओ, औ' इत्येतयोः परयोः 'औकारः' च, पूर्वपरयोः स्थाने एकादेशः भवति । एषः वृद्धिसन्धिः इत्युच्यते ।

| अ/आ + ए/ऐ | अ/आ + ओ/औ |
|---|---|
| ऐ | औ |

**२. पदच्छेदं कृत्वा सन्धिनियमं सूचयन्तु।**

१. तत्रैव = ............................... =
२. पुराणैतिह्यम् = ............................... =
३. ममौषधम् = ............................... =
४. सज्जनौदार्यम् = ............................... =
५. इहैकस्याम् = ............................... =

**३. सन्धिं कृत्वा सन्धिनियमं सूचयन्तु।**

१. देव + ऐश्वर्यम् = ............................... =
२. सुखस्य + ऐकान्तिः = ............................... =
३. घन + ओषधिः = ............................... =
४. पुण्याय + एव = ............................... =
५. कृष्ण + औत्कण्ठ्यम् = ............................... =

ई. **अत्र कानिचन पदानि सन्ति। तेषां विघटनं कृत्वा सन्धेः नाम लिखन्तु।**

अ. अन्नोत्पादनाय, आ. जलोपयोगेन, इ. रक्षणोपायान्, ई. कार्योपयोगाय

उ. **उदाहरणानुसारम् एतेषां समस्तपदानां विग्रहवाक्यानि लिखन्तु।**

**उदा।। अन्नोत्पादनम् = अन्नस्य उत्पादनम्**

१. जीवनाधाराः = ..............................

२. ऊर्जोत्पादानम् = ..............................

३. जलसंरक्षणम् = ..............................

४. कृमिनिरोधकम् = ..............................

ऊ. **ये क्रियापदानां पुरतः आगत्य, क्रियापदस्य अर्थं परिवर्तयन्ति ते उपसर्गाः।**

**उदा।। १. गच्छति - పోవుచున్నాడు. 'आ' इति उपसर्गमेलनेन,**

**आ-गच्छति = आगच्छति - వచ్చుచున్నాడు.**

अत्र दत्तान् उपसर्गान् क्रियापदैः सह योजयित्वा वदन्तु। योजनानन्तरम् अर्थान् लिखन्तु।

**उदा।। आ-नयति = आनयति**

| | |
|---|---|
| १. अनु-वदति = | २. आ-हरति = |
| ३. वि-हरति = | ४. सं-हरति = |
| ५. प्र-हरति = | ६. अव-गच्छति = |
| ७. उप-करोति = | ८. अभि-जानाति = |

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. **"मितजलव्ययः जीवनमूल्यम्" इति विषये कथां रचयन्तु।**

आ. **पाठस्थम् एकम् अंशं स्वीकृत्य सम्भाषणं लिखन्तु।**

SCERT TELANGANA

## ७. परियोजनाकार्यम्



अ. जलसंरक्षणार्थं गर्ताः कथं निर्मातव्याः इति ज्ञात्वा कक्ष्यायां वदन्तु।

आ. पट्टिकाम् अनुसृत्य कालुष्यकारणानि, तेभ्यः जायमानाः हानीः च लिखन्तु।

| संसाधनम् | कालुष्यकारणानि | हानयः |
|---|---|---|
| भूमिः | | |
| वायुः | | |

## ८. प्रशंसा



पत्रकारः - आर्य! भवन्तः जानन्ति एव यत् विद्यालयं छात्राः पठनार्थम् आगच्छन्ति। तैः श्रमकार्यं कारयन्ति। एषः अपराधः खलु?

प्रधानोपाध्यायः - भवन्तः अन्यविधेन चिन्तयन्ति। ते श्रमकार्यरूपेण जलसंरक्षणागर्तान् खनन्ति। एतत् कार्यं तेषां पाठ्यविषये परियोजनारूपेण दत्तम्। गृहे बृहत् प्रदेशः न भवति। अतः अत्र मिलित्वा कुर्वन्ति। वर्षाकाले उपयुज्यते।

पत्रकारः - तथा वा? एतत् उत्तमं कार्यम्। प्रत्येकस्मिन् विद्यालये एतत् आवश्यकम् एव। एकं छायाचित्रं स्वीकृत्य तेषां सेवां विलिख्य पत्रिकायै प्रेषयामि।

(जलसंरक्षणे छात्राणां दायित्वम् अधिकृत्य वदन्तु ।)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. जलस्य संरक्षणं कथं करणीयमिति वक्तुं शक्नोमि । | | | |
| ३. कालुष्यजलेन जायमानां हानिम् उद्दिश्य लेखितुं शक्नोमि। | | | |
| ४. ''मितजलव्ययः जीवनमूल्यम्'' इति विषये कथां रचयितुं शक्नोमि । | | | |




SCERT TELANGANA

तृतीयभागः

पठन्तु - नन्दन्तु

# चोराय उपाहारः



एकदा रात्रौ साबरमतिस्थस्य आश्रमस्य पाकमन्दिरं प्रविष्टवान् कश्चन चोरः। सः यदा किमपि चोरयन् आसीत् तदा तम् आश्रमवासिनः गृहीतवन्तः। आश्रमे चौर्यं कर्तुम् उद्यतस्य तस्य विषये सर्वेषां महान् क्रोधः आसीत् अतः सः सम्यक् प्रहृतः अपि। 'एषः इदानीम् एव आरक्षकाधीनः करणीयः' इति अभिप्रायं प्रकटितवन्तः केचन। किन्तु गान्धिवर्यस्य अनुज्ञां विना तत् असाध्यम् आसीत्।

अतः अग्रिमे दिवसे प्रातःकाले महात्मा गान्धिवर्यः उपाहारस्वीकरणाय यदा तत्र आगच्छत् तदा आश्रमवासिभिः सः चोरः तस्य सम्मुखे उपस्थापितः। चोरः कथं बद्धः इत्यादिकं गान्धिवर्यं विस्तरेण श्रावितवन्तः ते।

सर्वं श्रुत्वा गान्धिवर्यः अपृच्छत् - ''एतस्मै उपाहारः दत्तः भवद्भिः उत न? '' इति। ''उपाहरः कोऽपि न दत्तः'' इति अवदन् आश्रमवासिनः।

''चोरस्य उपाहारदानादिसत्कारः किमर्थम्?'' इति सक्रोधम् अपृच्छत् कश्चन आश्रमवासी। गान्धिवर्यः तं सकृत् गम्भीरतया अपश्यत्। क्षणं विरम्य सः - ''आदौ एतस्मै उपाहारः दीयताम्। तत्पश्चात् एषः मत्समीपम् आनेतव्यः'' इति आज्ञापयत्। तथैव कृतं तैः आश्रमवासिभिः। ततश्च पुरतः आगतं चोरं स्वपार्श्वे उपवेश्य गान्धिवर्यः सुमधुरैः वचोभिः अवदत् - ''भ्रातः, चोर्यकरणं महते पापाय। निर्धनत्वेन बाधितः सन् भवान् एवं कर्तुम् उद्युक्तः स्यात् इति भावयामि अहम्। निर्धनता सर्वपापमूला इति अहं जानामि। सा अनिच्छतः अपि जनेन पापकार्याणि कारयति। एवं ननु?''

''गान्धिवर्यस्य मृदुना व्यवहारेण सः चोरः आश्चर्यचकितः। गान्धिवर्येण चौर्यस्य वास्तविकं कारणं यत् ऊहितं तत् तस्मिन् आश्चर्यम् अजनयत्। गान्धिवर्यस्य मुखं निर्निमेषं पश्यन् सः मौनेन अतिष्ठत्।

गान्धिवर्यः एव पुनः अवदत् - ''मित्र, अलं चिन्तया। अहम् अस्मिन् एव आश्रमे तुभ्यं कार्यं दास्यामि। एतच्च दुष्कार्यं त्यज। अस्माभिः सह साधुजीवनं यापय। एतत् अनुमतं खलु भवतः? '' इति।

महात्मनः गान्धिवर्यस्य एतानि वचनानि श्रुत्वा द्रवीभूतान्तःकरणः सः चोरः गान्धिवर्यस्य पादौ गृह्णन् अश्रूणि स्रावितवान्। ततः सः आश्रमे एव निवसन् सर्वाणि कार्याणि श्रद्धया कुर्वन् उत्तमं जीवनं यापयन् साधुजनः अभवत्।

SCERT TELANGANA

चतुर्थभागः

एकादशः पाठः

# ११. धर्मबुद्धिः – पापबुद्धिः

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्राधारेण एकां कथां वदन्तु।
२. गर्दभस्य युक्तिः का?
३. एतादृशीम् अन्यां घटनां वदन्तु।

**पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।**

रामपुरग्रामे धर्मबुद्धिः पापबुद्धिः इति द्वे मित्रे प्रतिवसतः स्म। एकदा पापबुद्धिः एवम् अचिन्तयत्।

'अहं तावत् मूर्खः दरिद्रः च। अतः धर्मबुद्धिम् आदाय देशान्तरं गत्वा तस्य साहाय्येन प्रभूतं धनम् अर्जयित्वा तमपि वञ्चयित्वा सुखी भवामि।'

अथ अन्यस्मिन् दिवसे पापबुद्धिः धर्मबुद्धिसमीपं गत्वा एवम् अवोचत्।

पापबुद्धिः - भोः मित्र! जनः यावद् देशदेशान्तरं न गच्छति तावत् विद्यां, वित्तं च सम्यक् न प्राप्नोति इति ज्योष्ठाः वदन्ति। अतः आवां देशान्तरं गत्वा तत्रस्थान् विशेषान् दृष्ट्वा, विपुलञ्च धनं सम्पाद्य आगमिष्यावः।

पापबुद्धेः वचनं श्रुत्वा आनन्दितः धर्मबुद्धिः ''तथैव भवतु'' इत्युक्त्वा, ज्येष्ठानाम् अनुमतिं स्वीकृत्य देशान्तरं प्रस्थितः। धर्मबुद्धिः कार्यसमर्थः, ऋजुवर्तनश्च। स्वकौशलेन सः देशान्तरे प्रभूतं धनम् अर्जितवान्। धर्मबुद्धिना सह भ्रमन् तस्य प्रभावेण पापबुद्धिरपि विपुलं धनं सम्पादितवान्। ततः द्वावपि स्वार्जितधनेन नितरां सन्तुष्टौ स्वग्रामं प्रतिनिवृत्तौ। स्वग्रामसमीपस्थे गहने वने तौ गच्छन्तौ आस्ताम्। मार्गमध्ये पापबुद्धिः धर्मबुद्धिम् एवम् उक्तवान्।

पापबुद्धिः - भोः मित्र! सर्वम् एतत् धनं गृहं प्रति नेष्यामः चेत् कुटुम्बिनः बान्धवाश्च याचिष्यन्ते। अतः अस्मिन्नेव अरण्ये कुत्रापि भूमौ एतद् धनं निक्षिप्य, किञ्चिन्मात्रं स्वीकृत्य गृहं प्रविशावः। आवश्यकतायां सत्यां पुनः तावन्मात्रं धनं गृहं नेष्यावः। तेन अतिकष्टेन आर्जितं धनं व्यर्थं न भविष्यति।



NCERT TELANGANA



धर्मबुद्धिः पापबुद्धेः आशयम् अङ्गीकृत्य "तथैव कुर्वः" इत्युक्तवान्। द्वावपि एकस्य शमीवृक्षस्य अधः गर्तं कृत्वा, तस्मिन् धनं निक्षिप्य, गर्तं पूरयित्वा, स्वगृहं गत्वा सुखेन तिष्ठतः।

अपरस्मिन् दिवसे पापबुद्धिः मध्यरात्रे वनं गत्वा गर्ते स्थापितं सर्वं धनं स्वीकृत्य गर्तं पूरयित्वा स्वगृहं गतवान्। सः अन्यस्मिन् दिने धर्मबुद्धिसमीपं गत्वा उक्तवान् -

पापबुद्धिः - मित्र! कुटुम्बभारं वोढुं धनमावश्यकम्। अतः वनं गत्वा किञ्चिन्मात्रं धनम् आनेष्यावः।

धर्मबुद्धिः - मित्र! तथैव भवतु!

अथ द्वावपि वनं गत्वा यावत् गर्तं खनतः तावद् रिक्तभाण्डं दृष्टवन्तौ। तदा पापबुद्धिः स्वशिरः स्वयं ताडयन् कोपेन -

पापबुद्धिः - रे धर्मबुद्धे! भवानेव सर्वं धनम् अपहृतवान्। अपहृत्य पुनः गर्तापूरणं कृतवान्। ददातु मे तस्यार्धम्। नो चेत् इदानीमेव गत्वा धर्माधिकारिणं निवेदयिष्यामि।

धर्मबुद्धिः - भोः दुष्ट! एवं मा वदतु। अहं तु धर्मबुद्धिः। ईदृशचोरकार्यं कदापि न करोमि। इदानीमेव धर्माधिकारिसमीपं गच्छावः। कः चोरः इति निर्णीतं भविष्यति।

SCERT TELANGANA



एवं द्वावपि परस्परं कलहायमानौ, परस्परं दूषयन्तौ च धर्माधिकारिसमीपं गत्वा, कलहकारणं निवेदितवन्तौ। धर्माधिकारी द्वावपि दिव्यग्रन्थस्पर्शं कृत्वा प्रतिज्ञातुम् आज्ञापितवान्।

तदैव पापबुद्धिः भोः! एतदनुचितम्! साक्षिणाम् अभावे दिव्यपरीक्षा करणीया। मम तु वृक्षदेवताः साक्षिभूताः तिष्ठन्ति। ताः एव आवयोर्मध्ये कः चोरः? कः साधुः? इति निर्णेष्यन्ति।

धर्माधिकारी पापबुद्धेः आशयम् अङ्गीकृत्य "श्वः प्रातरेव भवद्भ्याम् अस्माभिस्सह वनम् आगन्तव्यम्" इति आदिष्टवान्। एतस्मिन्नन्तरे पापबुद्धिः स्वगृहं गत्वा स्वजनकम् एवमुक्तवान्।

पापबुद्धिः - "तात! धर्मबुद्धिः मम प्रभूतं धनं चोरितवान्। भवान् साक्षी भूत्वा मम वचनानुसारं वने धर्मबुद्धिरेव चोरः इति कथयतु। तेन धर्मबुद्धिः चोरः इति प्रमाणितं भवति। अन्यथा मम प्राणाः एव गमिष्यन्ति।"

पापबुद्धेः पिता - पुत्र! मम कर्तव्यं वदतु। अवश्यं करिष्यामि।

पापबुद्धिः - तात! तस्मिन् वने एकः महान् शमीवृक्षः अस्ति। तस्मिन् महाकोटरमस्ति। भवान् इदानीमेव गत्वा तस्मिन् कोटरे उपविशतु। श्वः प्रभाते धर्माधिकारिणः पुरतः यदा अहं सत्यं कथयिष्यामि तदा भवान् 'धर्मबुद्धिरेव चोरः' इति उच्चैः वदतु।

पापबुद्धेः पिता - "तथैव करिष्यामि।"

अपरस्मिन् दिने प्रातः पापबुद्धिः, धर्मबुद्धिः, धर्माधिकारी, इतरे सभ्यजनाश्च मिलित्वा वने प्रविश्य यत्र धनं स्थापितमासीत् तस्य शमीवृक्षस्य समीपम् अगच्छन्। तदा पापबुद्धिः एवमुच्चैः उक्तवान्।

SCERT TELANGANA

पापबुद्धिः - भगवति वनदेवते! आवयोः मध्ये कः चोरः? कृपया कथयतु!

तदा शमीकोटरस्थः पापबुद्धेः पिता उच्चैः उक्तवान्। "भोः! श्रुण्वन्तु! धर्मबुद्धिरेव धनम् अपहृतवान्। अतः सः एव चोरः" -

तत् श्रुत्वा सर्वे विस्मिताः अभवन्। धर्मबुद्धिः तस्मिन् अविश्वस्य, शमीकोटरे शुष्कग्रासादिकं संस्थाप्य, वह्निं ज्वालितवान्। प्रदहता तेन वह्निना अर्धदग्धशरीरः पापबुद्धेः पिता उच्चैः आक्रन्दनं कुर्वन् कोटराद् बहिरागतः। धर्माधिकारी तं गृहीत्वा, यथार्थवृत्तान्तं ज्ञात्वा, धर्मबुद्धिं प्रशंस्य, पापबुद्धिं बद्ध्वा, कारागारे स्थापितवान्।



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. कथां स्वीयवाक्यैः वदन्तु।

आ. सर्वं धनं गृहं प्रति नेष्यावः चेत् किं भविष्यति इति पापबुद्धिः अवदत्?

इ. पापबुद्धिः किमर्थं धनं सर्वम् अपहृतवान्?

ई. अनेन पाठेन भवान् किम् अवगतवान्?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तानि पदानि पाठे अन्विष्य तेषाम् अधः रेखाङ्कनं कुर्वन्तु। पदकोशं दृष्ट्वा तेषाम् अर्थान् जानन्तु।

| | | | | |
|---|---|---|---|---|
| प्रभूतम् | विपुलम् | गहने | देशान्तरम् | आर्जितम् |
| कोटरः | रिक्तभाण्डम् | ऋजुवर्तनः | अर्धदग्धशरीरः | प्रमाणितम् |

आ. अधः दत्तानि वाक्यानि पठन्तु। तत्समानार्थकवाक्यानि पाठे अन्विष्य लिखन्तु।

1. పెద్దల అనుమతి తీసుకొని దేశాటనకు బయలుదేరాడు.
2. ఇప్పుడే ధర్మాధికారి వద్దకు వెళ్దాం.
3. ధర్మబుద్ధే దొంగ అని చెప్పు.
4. ధర్మాధికారి ఇద్దరినీ దివ్యగ్రంథాన్ని తాకి ప్రతిజ్ఞ చేయమని ఆజ్ఞాపించాడు.
5. ధర్మబుద్ధి పనిచేయగల సమర్థుడు. మంచినడవడిక కలవాడు.

SCERT TELANGANA

इ. अधः दत्तानि वाक्यानि कः कं प्रति वदति इति लिखन्तु।

| | कः? | कंप्रति? |
|---|---|---|
| १. तथैव भवतु। | ........... | ........... |
| २. मित्र! कुटुम्बभारं वोढुं धनमावश्यकम्। | ........... | ........... |
| ३. एतदनुचितम्। साक्षिणाम् अभावे दिव्यपरीक्षा करणीया। | ........... | ........... |
| ४. श्वः प्रातरेव भवद्भ्याम् अस्माभिस्सह वनम् आगन्तव्यम्। | ........... | ........... |
| ५. मम कर्तव्यं वदतु। अवश्यं करिष्यामि। | ........... | ........... |
| ६. अतः सः एव चोरः। | ........... | ........... |

## ३. लेखनं, स्वीयरचना



अ. पठन्तु, लिखन्तु

१. पापबुद्धिः धर्मबुद्धिश्च कस्मिन् ग्रामे वसतः स्म?
२. धनार्जनविषये पापबुद्धेः चिन्तनं किम्?
३. ‘‘धर्मबुद्धिः व्यापारनिपुणः’’ इति कानि पदानि सूचयन्ति?
४. चोरितधनरक्षणार्थं पापबुद्धिः कीदृशीं युक्तिं चिन्तितवान्?
५. पापबुद्धेः वञ्चना कथं बहिर्गता अभवत्?



आ. चिन्तयन्तु, लिखन्तु

१. पापबुद्धिः कीदृशः?
२. धर्मबुद्धिः कीदृशः?
३. पापबुद्धेः जनकः स्वपुत्रस्य साहाय्यं किमर्थं कृतवान्?
४. पूर्वं ग्रामेषु धर्माधिकारिणः किं किं कुर्वन्ति स्म?

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



अ. अधः दत्तानि पदानि उपयुज्य स्वीयवाक्यानि लिखन्तु।

आदाय, सम्पाद्य, स्वीकृत्य, निक्षिप्य, अङ्गीकृत्य, प्रविश्य, संस्थाप्य, ज्ञात्वा, गत्वा, अर्जयित्वा, दृष्ट्वा, श्रुत्वा, उक्त्वा, कृत्वा, पूरयित्वा, मिलित्वा, गृहीत्वा।

SCERT TELANGANA

## आ. बन्धुवाचकानि

१. अधस्थानि चित्राणि दृष्ट्वा तेषां बन्धुत्वम् अवगच्छन्तु।




अत्र पट्टिकायां बन्धुवाचकानि पदानि सन्ति। तैः सह बन्धुवाचकवाक्यानि लिखन्तु।

| | | | | | |
|---|---|---|---|---|---|
| माता | पिता | पुत्रः | दौहित्री | स्नुषा | पौत्री |
| पितामही | मातामहः | मातामही | श्वश्रूः | जामाता | पितामहः |
| दौहित्रः | पुत्री | पतिः | पत्नी | अग्रजः | भगिनी |

**उदा : - यमुना रामदासस्य स्नुषा।**

## ५. व्याकरणांशा



### अ. अत्र दत्तानि पदानि अवगच्छन्तु।

१. प्रभूतं धनम्　　　३. गहने वने

२. विपुलं धनम्　　　४. दिव्या परिक्षा

☞ अत्र धनम्, वने, परीक्षा, इत्यादीनि संज्ञावाचकानि। प्रभूतं, विपुलं, गहने, दिव्या इत्यादीनि पदानि तेषां संज्ञावाचकानां गुणम्, स्वभावम्, परिमाणम् इत्यादीनि प्रकटयन्ति। अतः एतानि विशेषणानि।

SCERT TELANGANA

## आ. अधः दत्तेषु पदेषु संज्ञावाचकानि, विशेषणानि च विभज्य लिखन्तु।

स्वार्जितं धनम् , महान् कोटरः, अर्धदग्धः शरीरः, रिक्तं भाण्डम्

| | विशेषणानि | संज्ञावाचकानि |
|---|---|---|
| १. | ........................ | ........................ |
| २. | ........................ | ........................ |
| ३. | ........................ | ........................ |
| ४. | ........................ | ........................ |

## इ. परिच्छेदं पठित्वा विशेषणपदानि, संज्ञावाचकानि च पट्टिका रूपेण लिखन्तु।

सुनीता एका मृत्तिकाशिल्पकारिणी। सा मृत्तिकया अनेकरूपाणि निर्माति। तदर्थं सा नूतनोपकरणानि उपयुङ्क्ते। मृत्तिकारूपाणि, अमूल्यैः वस्त्रैः, सुवर्णहारैः, वर्णपुष्पैः अलङ्करोति। सा प्रतिदिनं पुस्तकापणं गच्छति। तत्र विविधचित्राणि, पुरातनचित्राणि, मनोहरचित्राणि, वस्त्रवैविध्यचित्राणि क्रीणाति। तानि दृष्ट्वा मृत्तिकारूपाणि अलङ्करोति।

## ई. जया-किशोरयोः अभीष्टानि भिन्नानि। तयोः कार्याणि अवगच्छन्तु।

१. किशोरः रामायणं पठितुम् (पठनम्) इच्छति।

२. जया चित्रलेखनं कर्तुम् (करणम्) इच्छति।

३. किशोरः शीतलपानीयं पातुम् (पानम्) आपणं गच्छति।

४. जया चलनचित्रं द्रष्टुं (दर्शनम्) गृहे अस्ति।

## उ. एतानि पदानि पठन्तु।

| | | | | | |
|---|---|---|---|---|---|
| १. पठितुम् | - | पठनम् | ३. कर्तुम् | - | करणम् |
| २. पातुम् | - | पानम् | ४. द्रष्टुम् | - | दर्शनम् |

## ऊ. उपरि दत्तानि पदानि अनुसृत्य अधः दत्तेषु वाक्येषु समुचितं पदं लिखन्तु।

१. केशवः गीतं................ (श्रवणम्) चलद्वाणीम् उपकरोति।

२. जया पुस्तकं................ (क्रयणम्) आपणं गच्छति।

३. दिवाकरः.................... (स्नानम्) नदीं गच्छति।

४. पुष्पा.................... (भाषणम्) अन्यां गृहिणीम् आह्वयति।

५. शङ्करः रामायणं................ (पठनम्) ग्रन्थालयं गच्छति।

६. बसवराजः रोटिकाः................. (खादनम्) भोजनमन्दिरं गतवान्।

SCERT TELANGANA

**ऋ. अधः दत्तं वाक्यद्वयं क्रियापदस्य परिवर्तनेन एकं वाक्यं कुर्वन्तु।**

उदा - **माता पाठशालां गच्छति। बालकं गृहं नयति ।**
**माता बालकं नेतुं पाठशालां गच्छति।**

१. वृद्धः फलं खादितवान्, फलानि क्रीतवान्।
२. शुनकः अन्तः प्रविशति, वेगेन आगच्छति।
३. पद्मा वस्त्राणि क्रीणाति, धनं गणयति।
४. नवीनः चलनचित्रं दृष्टवान्, मित्रेण सह भाषते।

**ॠ. उदाहरणं दृष्ट्वा समुचितपदानि लिखन्तु।**

**उदा।। लिखति - लेखितुम्**

| | |
|---|---|
| १. खादति - .................. | २. वदति - .................. |
| ३. करोति - .................. | ४. क्रीडति - .................. |
| ५. नयति - .................. | ६. भवति - .................. |
| ७. पठति - .................. | ८. आनयति - .................. |
| ९. धावति - .................. | १०. पिबति - .................. |

**ए. सम्भाषणम् उच्चैः पठन्तु।**

विनायकः - मित्राणि अद्य सायं मम सोदर्याः जन्मदिनोत्सवः। भवन्तः समये आगच्छन्ति चेत् पयोहिमं लभ्यते। नो चेत् न लभ्यते।

गिरिधरः - सायङ्काले गृहपाठः लेखनीयः। नोचेत् समाप्तः न भवति। सम्पूर्णःभविष्यति चेत् आगमिष्यामि।

विकासः - सायं मम अम्बया सह बहिर्गमनमस्ति चेत् नागमिष्यामि। नो चेत् आगमिष्यामि।

सागरिका - सङ्गीतकक्ष्या नास्ति चेत् अहमागमिष्यामि। नो चेत् न।

विनायकः - भवतु। सर्वे प्रयत्नं कुर्वन्तु। नोचेत् पयोहिमानि व्यर्थानि भविष्यन्ति।

**ऐ. अधः दत्तानि पदानि उपयुज्य 'चेत्', 'नो चेत्' इत्यव्यययोः साहाय्येन वाक्यानि लिखन्तु।**

| | | | |
|---|---|---|---|
| वृष्टिः | | सस्यम् | |
| अधिकखादनम् | | अनारोग्यम् | |
| उपनेत्रम् | चेत् | पठति | नोचेत् |
| जलम् | | ददातु | |
| इन्धनतैलम् | | चलति | |



SCERT TELANGANA

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. ''एतस्मिन्नन्तरे पापबुद्धिः स्वगृहं गत्वा''.... इति आरभ्य कथाम् अन्यप्रकारेण पूरयन्तु।

आ. पाठ्यकथां लघुनाटिकारूपेण प्रदर्शयन्तु।

## ७. परियोजनाकार्यम्



अ. ''परधनहरणचिन्तनेन स्वगौरवं न्यूनं भवति'' इत्यंशं स्वीकृत्य अन्यां कथां/घटनां वा लिखन्तु अथवा सङ्कलयन्तु।

## ८. प्रशंसा।



अध्यापकः - गतदिने श्रीनिवासः स्वबुद्धिबलेन एकस्य वणिजः वञ्चनां निरुद्धवान्। श्रीनिवास! अत्रागच्छतु। गतदिनवृत्तान्तं वदतु।

श्रीनिवासः - मित्राणि! गतदिने ममाम्बा किलोमितशर्कराम् आनेतुं माम् आपणं प्रेषितवती। अहं धनं दत्वा वणिजं शर्करां ददातु इत्युक्तवान्। सः शर्करां तोलयित्वा अदात्। किन्तु सा शर्करा किलोमिता नास्तीति सन्देहः आगतः। तस्य तुलायाम् अधः एकं चुम्बकं दृष्टवान्। तं चुम्बकं सर्वेभ्यः दर्शितवान्।

अध्यापकः - अहं श्रीनिवासम् अभिनन्दामि। भवन्तः अपि एवं चतुराः भवेयुः।

(एतादृशं कार्यं कोऽपि करोति चेत् तम् भवान्/भवती कथम् अभिनन्दति।)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. कथां स्वीयवाक्यैः वक्तुं शक्नोमि । | | | |
| ३. कठिनपदानि वाक्येषु प्रयोक्तुं शक्नोमि । | | | |
| ४. पाठ्यकथां लघुनाटकरूपेण प्रदर्शयितुं शक्नोमि । | | | |

★ ★ ★

SCERT TELANGANA

चतुर्थभागः

द्वादशः पाठः

# १२. प्रहेलिकाः

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।




१. चित्रे कानि कानि दृश्यन्ते?

२. तयोः मध्ये सम्बन्धः कः?

३. भवान्/भवती एतादृशप्रहेलिकाः वक्तुं शक्नोति वा?

## पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।





एकस्मिन् ग्रामे एका महिला सुदूरस्थं रामालयं गच्छन्ती आसीत्। मार्गस्थे एकस्मिन् वृक्षे एकः शापग्रस्तः ब्रह्मराक्षसः आसीत्। सा महिला यदा तस्य वृक्षस्य समीपम् आगतवती, तदानीं सः ब्रह्मराक्षसः ताम् एवमुक्तवान् -





ब्रह्मराक्षसः - हे महिले। कुत्र गच्छति? तिष्ठ तत्रैव।

महिला - (भीतिम् अनुभवन्ती) हा!

ब्रह्मराक्षसः - अहं ब्रह्मराक्षसः। भवतीं खादितुमिच्छामि। तिष्ठ तत्रैव।

महिला - अहं देवालयं गच्छन्ती अस्मि। कृपया मां त्यजतु।

ब्रह्मराक्षसः - हुं! यदि इतः गन्तुमिच्छति तर्हि मम प्रश्नानां समाधानानि वदतु।

महिला - अस्तु। पृच्छतु। शक्यते चेत् समाधानं दास्यामि।

ब्रह्मराक्षसः - **न तस्यादिः न तस्यान्तः मध्ये यस्तस्य तिष्ठति।**
**तवाप्यस्ति ममाप्यस्ति यदि जानासि तद्वद।।**

महिला - (चिन्तयित्वा) नयनम्।

ब्रह्मराक्षसः - भवती बुद्धिमती अस्ति। अस्तु, अन्यत् पृच्छामि -

**दन्तैर्हीनः शिलाभक्षी निर्जीवो बहुभाषकः।**
**गुणस्यूतिसमृद्धोऽपि परपादेन गच्छति।।**





NCERT TELANGANA



महिला - पादरक्षा।

ब्रह्मराक्षसः - साधु साधु।

**वृक्षाग्रवासी न च पक्षिराजः**
**त्रिनेत्रधारी न च शूलपाणिः।**
**त्वग्वस्त्रधारी न च सिद्धयोगी**
**जलं च बिभ्रन्नघटो न मेघः॥**

महिला - नारिकेलम्।

ब्रह्मराक्षसः - उत्तमम्।

**सीमन्तिनीषु का शान्ता? राजा कोऽभूत् गुणोत्तमः।**
**विद्वद्भिः का सदा वन्द्या? अत्रैवोक्तं न बुध्यते॥**

महिला - सीता - रामः - विद्या।

ब्रह्मराक्षसः - अत्युत्तमं, भवती समयस्फूर्त्या समाधानानि वदति। अन्तिममेकं प्रश्नं पृच्छामि। यदि भवती अस्य प्रश्नस्य समाधानं वदति तर्हि अहम् अस्मिन् ग्रामे एव न तिष्ठामि।

**राज्ञः सम्बोधनं किं स्यात्?**
**सुग्रीवस्य तु का प्रिया?**
**अधनास्तु किमिच्छन्ति?**
**आर्तैः किं विधीयते?**

महिला - देव- तारा - धनम् - देवताराधनम्

ब्रह्मराक्षसः - साधु महिले साधु। प्रसन्नोऽहम्। प्रसन्नोऽहम्। भवत्याः समाधानैः मम शापविमोचनम् अभवत्। धन्यवादः। (इति अन्तर्लीनः भवति।)

SCERT TELANGANA



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. चित्रे के के सन्ति?

आ. संवादः कयोः मध्ये प्रचलति?

इ. महिला कुत्र गच्छन्ती आसीत्?

ई. ब्रह्मराक्षसः किमर्थं तत्र अस्ति?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तानि पदानि पाठे अन्विष्य तेषाम् अधः रेखाङ्कनं कुर्वन्तु। पदकोशं दृष्ट्वा तेषाम् अर्थान् जानन्तु।

| | | | | |
|---|---|---|---|---|
| भगवता | मार्गस्थः | शापग्रस्तः | नयनम् | दन्तैर्हीनः |
| शिलाभक्षी | बहुभाषकः | पादरक्षा | वृक्षाग्रवासी | त्वग्वस्त्रधारी |
| सिद्धयोगी | त्रिनेत्रधारी | पक्षिराजः | मेघः | नारिकेलम् |
| सीमन्तिनीषु | समयस्फूर्त्या | बुध्दिमती | | |

आ. अधः दत्तानि पदानि पठित्वा उचितस्थाने पाठानुगुणं स्थापयन्तु।

भगवतः ग्रामे एका महिला, ब्रह्मराक्षसः श्रीरामस्य वृक्षे गच्छन्ती आसीत्।
मार्गस्थे एकस्मिन् मन्दिरम् एकः शापग्रस्तः एकस्मिन् आसीत्।

इ. प्रहेलिकानां भावं स्पष्टतया पठन्तु। अवगच्छन्तु।

'న' అక్షరాన్ని మొదలు గాను, చివర గాను, 'య' అక్షరాన్ని మధ్యగాను కలిగినదేమిటి? అది నీవు కలిగి ఉన్నావు నేనూ కలిగి ఉన్నాను. తెలిస్తే చెప్పు.

పళ్ళే లేవు. కాని రాళ్ళు తింటుంది. జీవమే లేదు కాని భలే మాట్లాడుతుంది. దారాల సంచిని కలిగి ఉన్నా వేరే వారి కాళ్ళతో నడుస్తుంది.

చెట్టుకొమ్మన ఉంటుంది, కాని పక్షి కాదు, మూడుకన్నులు కలది, కాని శివుడు కాదు, చర్మాన్నే వస్త్రంగా ధరిస్తుంది, కాని యోగి కాదు. నీటిని కలిగి ఉంటుంది, కాని కుండకాదు. మేఘం అసలే కాదు.

SCERT TELANGANA

స్త్రీల యందు శాంతమైన స్వభావం కలదెవరు? గుణములతో ఉత్తముడైన రాజు ఎవరు? విద్వాంసులు నమస్కరించేదెవరికి? వీటి జవాబులు ఇక్కడే ఉన్నాయి కాని తెలియదు.

రాజును ఎలా సంబోధిస్తావు? సుగ్రీవుని ప్రేయసి ఎవరు? నిర్ధనులు దేనిని కోరుకుంటారు? దుఃఖితులు ఏం చేస్తారు?

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. 'हे महिले! तिष्ठ' इति केन उक्तम्?

२. त्रिनेत्रधारी, न पक्षिराजः। कः सः?

३. सीमन्तिनीषु का शान्ता?



### आ. चिन्तयन्तु, लिखन्तु

१. ब्रह्मराक्षसः महिलां किमर्थं प्रशंसितवान्?

२. 'देवताराधनम्' इति समाधानं कस्य प्रश्नस्य? तस्यां प्रहेलिकायां कः विशेषः अस्ति?

३. ब्रह्मराक्षसः महिलां किमर्थं न खादितवान्?

४. ब्रह्मराक्षसः कीदृशः?

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. अधः दत्तानां प्रश्नानां समाधानानि संस्कृतेन यच्छन्तु।

1. ఇల్లంతా తిరుగుతుంది మూలన కూర్చుంటుంది.
2. అమ్మ అంటే కలుస్తాయి, నాన్న అంటే కలవవు.
3. దగ్గరగా ఉంటాయి కాని కనపడవు.
4. తోకలేని పిట్ట 90 ఆమడలు వెళ్ళింది.
5. నాన్న లెక్క పెట్టలేడు.
6. అమ్మ చుట్టలేని చాప.

SCERT TELANGANA

**आ. प्रश्नानां समाधानानि वदन्तु। पदमञ्जरीं पूरयन्तु।**

**उपरिष्टात् अधः**

1. मन्दिरस्य पर्यायः
4. सीमन्तिनीषु का शान्ता
5. न तस्यादिः न तस्यान्तः मध्ये तिष्ठति ''यः'' तत् किम्
6. राजा कोऽभूत् गुणोत्तमः

**वामतः दक्षिणम्**

1. राज्ञः सम्बोधनं किं स्यात्।
2. सुग्रीवस्य प्रिया का?
3. अधनास्तु किम् इच्छन्ति?
7. श्रीरामस्य पुत्रः कः



**इ. चिन्तयित्वा समाधानानि लिखन्तु।**

अ. श्रावणः इति पदे कः राक्षसः अस्ति। ....................

आ. ब्रह्मराक्षसः इति पदे कः देवः अस्ति। ....................

**ई. अधः दत्तानां प्रश्नानां समाधानानि कोष्ठकसाहाय्येन लिखन्तु।**

**उदा।। वनं न तु वनम् - भवनम्**

१. हारः न तु हारः -

२. यामि न तु यामि -

३. जनं न तु जनम् -

SCERT TELANGANA

४. योगः न तु योगः -

५. अञ्जलिः न तु अञ्जलिः -

६. शेषः न तु शेषः -

७. धनं न तु धनम् -

भवनम्, ब्रह्म, सम्बोधनम्, पतञ्जलिः, रावणः, विशेषः, उपयोगः, कवयामि, आहारः, भोजनम्

उ. अधः दत्तानि पदानि उपयज्य वाक्यानि लिखन्तु।

अ. बहुभाषकः आ. वृक्षाग्रम् इ. गुणोत्तमः ई. पक्षिराजः

## ५. व्याकरणांशाः



अ. अधः दत्तानि समासपदानि, तेषां विग्रहवाक्यानि च उच्चैः पठन्तु, अवगच्छन्तु।

विग्रहवाक्यं नाम समासपदस्य विवरणमेव।

१. दन्तहीनः - दन्तैः हीनः, ४. शिलाभक्षी - शिलायाः भक्षी

२. गुणोत्तमः - गुणैः उत्तमः, ५. वृक्षाग्रम् - वृक्षस्य अग्रम्

३. शापग्रस्तः - शापेन ग्रस्तः, ६. पक्षिराजः - पक्षिणां राजा

आ. यण्सन्धिः

१. एतानि उदाहरणानि परिशीलयन्तु।

1. प्रति + एकम्

= प्रत् + इ + एकम् = प्रत्येकम् । (इ = य्)

2. नदी + अत्र

= नद् + ई + अत्र = नद्यत्र । (ई = य्)

इ/ई + (असवर्णस्वरः) = य्

SCERT TELANGANA

3. मनु + अन्तरम्

= मन् + उ + अन्तरम् = मन्वन्तरम् । (उ = व्)

4. वधू + आगमनम्

= वध् + ऊ + आगमनम् । (ऊ = व्)

उ/ऊ + (असवर्णस्वरः) = व्

5. पितृ+ इच्छा

= पित् + ऋ + इच्छा = पित्रिच्छा। (ऋ = र्)

ऋ/ ॠ + (असवर्णस्वरः) = र्

6. घस्लृ + आदेशः

= घस् + लृ + आदेशः = घस्लादेशः । (लृ = ल्)

लृ + (असवर्णस्वरः) = ल्

इ, ई, उ, ऊ, ऋ, ॠ, लृ इत्येतेभ्यः वर्णेभ्यः असवर्णे स्वरे परे 'इ, ई' इत्यनयोः स्थाने यकारः, उ, ऊ इत्यनयोः स्थाने वकारः, ऋ, ॠ इत्यनयोः स्थाने रकारः(रेफः), लृकारस्य स्थाने लकारश्च आदेशः भवति। एषः यण्सन्धिः इत्युच्यते।

| इ/ई | उ/ऊ | ऋ/ ॠ | लृ |
|---|---|---|---|
| य् | व् | र् | ल् |

+ असवर्णस्वरः

## २. पदच्छेदं कृत्वा सन्धिनियमं सूचयन्तु।

१. यद्यपि = ..............................

२. त्वन्यः = ..............................

३. कट्वौषधम् = ..............................



SCERT TELANGANA

४. मात्रैश्वर्यम् = ..............................

५. तेष्ववस्थितः = ..............................

६. धात्रंशः = ..............................

७. इत्याचरन्ति = ..............................

**३. सन्धिं कृत्वा सन्धिनियमं सूचयन्तु।**

१. परन्तु + इष्टः = ..............................

२. नदी + ओघः = ..............................

३. अपि + अन्यः = ..............................

४. दातृ + औदार्यम् = ..............................

५. तेषु + ईप्सितः = ..............................

६. मधु + अरिः = ..............................

७. अति + उत्तमः = ..............................

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. तेलुगुभाषायां "पोड्डुपु कथलु" इति भवन्ति। तानि सङ्गृह्य आनयन्तु। सरलशब्दैः तेषां संस्कृतानुवादं कर्तुं प्रयत्नं कुर्वन्तु।

आ. महिला-ब्रह्मराक्षसयोः संवादं कथारूपेण लिखन्तु।

## ७. परियोजनाकार्यम्



अ. संस्कृते विविधप्रहेलिकाः सङ्गृह्णन्तु। ताः भित्तिपत्रिकायां सचित्रं लेपयन्तु।

SCERT TELANGANA

## ८. प्रशंसा



प्रदीपः - मित्र! भवान् अद्य महोल्लासे दृश्यते। किं कारणम्?

करुणाकरः - प्रदीप! रात्रौ अहं नूतनप्रहेलिकाः सञ्जीकृतवान्। उपाध्यायः उक्तवान् खलु!

प्रदीपः - दर्शयतु! एकं, द्वे,......विंशति प्रहेलिकाः सन्ति। उत्तमम्। अद्य कक्ष्यायां पृच्छति वा।

करुणाकरः - आम्।

(एवम् उपाध्यायेन निर्दिष्टं कार्यं सम्यक् कृतवन्तं छात्रं भवान्/भवती कथं प्रशंसति।)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. प्रहेलिकानां भावं वक्तुं शक्नोमि । | | | |
| ३. कथायाः घटनां स्वीयवाक्यैः लेखितुं शक्नोमि। | | | |
| ४. पाठं कथारूपेण लेखितुं शक्नोमि । | | | |




SCERT TELANGANA

चतुर्थभागः

त्रयोदशः पाठः

# १३. वनेचरः

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रे काः सन्ति?
२. ताः किं कुर्वन्ति?
३. तादृशजनान् कदापि दृष्टवन्तः वा?



**पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।**

(भाग्यनगरे विजयदशम्यां पेद्दम्मगुडिसमीपे एकः कोयजातीयः गिरिजनः निस्स्पृहः तिष्ठति। तत्र आगताः तस्य वेषभूषादिकम् आश्चर्येण पश्यन्ति। तेषु एकः वार्ताहरः तं वनेचरम् एवम् अपृच्छत्।)

वार्ताहरः - भवान् कः? भवतः नाम किम्? कुतः अत्र आगतवान्?

गिरिजनः - दोर! अहं कोयदोरः। मम नाम रामदेवः। भद्राचलात् अत्र आगतवान्।

वार्ताहरः - भवान् नगरं किमर्थम् आगतवान्?

रामदेवः - यात्रां कुर्वन् मेडारं सम्मक्क-सारलम्म सन्निधिं, वरङ्गल् नगरे भद्रकालीं, यादगिरौ नारसिंहं च संसेव्य राजधानीम् आगतवान्।

वार्ताहरः - एतां राजधानीं दृष्ट्वा भवान् किं चिन्तयन्ति?

रामदेवः - किं वदामि? अत्र जनाः गृहेषु न निवसन्ति वा? मार्गाः सर्वदा जनसङ्कीर्णाः वाहनपूर्णाः च। वृक्षाः विरलाः। कुत्रापि जलपातः नास्ति। याचकाः चत्वरेषु जनानाम् उपरि पतन्ति।

SCERT TELANGANA



सूर्यातपः तीक्ष्णः अस्ति। मार्गस्य उभयपार्श्वयोः तत्र तत्र अवकरकण्डोलाः सन्ति। दुर्गन्धः नासिकां पीडयति। रात्रौ मशकाः दशन्ति। अत्र बहुधनं स्वीकृत्य अल्पम् एव आहारं यच्छन्ति। नगरस्य इदमेव महत्त्वम् अनुभूतम्।



वार्ताहरः - अस्तु रामदेव! कथयतु स्वस्थानस्य स्वरूपम्।

रामदेवः - दोर! कोयजातीयाः भद्राचलपरिसरे खम्मम्, प्राक्पश्चिमगोदावरीमण्डलेषु अधिकतया निवसन्ति। वनेचराणाम् अस्माकं गिरयः, तरवः, झर्यः जनस्थानानि च देवतारूपाणि भवन्ति।

वार्ताहरः - वने भवन्तः आहारं कथं सम्पादयन्ति?

रामदेवः - वनेषु कन्दं, मूलं, मधु, फेनिलं, तिन्त्रिणीं, मधूकम्, आमलकं, चर्मसाह्वादिकं संगृह्य समीपवर्तिनीषु पल्लीषु नयामः। तत्र वस्तुविनिमयेन आवश्यकान् आहारपदार्थान् प्राप्नुमः।

वार्ताहरः - गिरिजनानाम् आवासकल्पनम्, आरोग्यपरिरक्षणम्, आत्मसंरक्षणं च कथं भवति?



SCERT TELANGANA



रामदेवः - शृणोतु। गिरिजनाः स्वयं पर्णशालाः निर्माय सामूहिकजीवनं कुर्वन्ति। वनौषधिभिः रोगनिवारणं, स्वास्थ्यसंरक्षणं च कुर्वन्ति। धनुर्बाणधारिणः क्रूरमृगादिभ्यः आत्मरक्षणं च कुर्वन्ति। सर्वे मिलित्वा वनदेवताम् आराधयन्ति। उत्सवादिकं निर्वर्तयन्ति।

वार्ताहरः - नागरिकाः वयं स्वास्थ्यसंरक्षणाय व्यायामशालां गत्वा बहुश्रमं कुर्मः। व्यायामं विनापि भवान् तु स्वस्थः दृश्यते। भवतः स्वास्थ्यरहस्यं वदतु।

रामदेवः - (हसित्वा) दोर! कदापि वयं वृक्षच्छेदनं न कुर्मः। विनोदार्थमपि जन्तुहिंसां न कुर्मः। विश्वे सर्वप्राणिनां जीवनेनैव प्रकृतिसमतौल्यं भवतीति दृढं जानीमः। जलपातेषु, प्रवाहजलेषु च व्यर्थवस्तुजातं न पातयामः। एवं प्रकृतेः आराधकाः वयं स्वस्थाः भवामः।

वार्ताहरः - साधु! रामदेव साधु! भवतां संस्कृतिः सर्वादरणीया अस्ति। गिरिजनसंस्कृतिरेव विश्वसंस्कृतीनां मूलम्। सर्वेजनाः गिरिजनसंस्कृतिमूल्यानि जानन्तु। गिरिजनसंस्कृतेः प्रचारार्थम् अहं यथाशक्ति प्रयत्नं करिष्यामि।



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. अस्मिन् पाठे किं वर्णितम्?

आ. भवान्/भवती कदापि वार्ताहरेण सह सम्भाषणं कृतवान्/कृतवती वा?

इ. भवताम्/भवतीनां कदापि रामदेवसदृशजनस्य परिचयः अभवत् वा?

ई. गिरिजनाः कुत्र वसन्ति?

उ. तेषां वेषधारणं वर्णयतु।

ऊ. भवताम् प्रार्थनालयस्य/देवालयस्य परिसरे कानि कानि दृश्यन्ते?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः कानिचन पदानि सन्ति। तेषां समानार्थकपदानि पाठे अन्विष्य लिखन्तु।

1. కూడళ్ళు – ..............................
2. చెత్తకుండీలు – ..............................
3. జలపాతాలు – ..............................
4. తమను తాము రక్షించుకోవడం – ..............................
5. అందరిచే ఆదరింపదగినది – ..............................
6. సీకాకాయ – ..............................
7. చెట్లు నరుకుట – ..............................
8. ఆరోగ్యరహస్యం – ..............................

आ. अधः दत्तानि पदानि पाठे अन्विष्य वर्तुलेन ( ⬭ ) अङ्कयन्तु। तेषाम् अर्थान् जानन्तु।

| | | | |
|---|---|---|---|
| स्वास्थ्यसंरक्षणम् | फेनिलम् | पर्णशालाः | गिरिजनसंस्कृतिः |
| वस्तुविनिमयेन | मार्गपार्श्वयोः | जनसङ्कीर्णाः | जलस्थानानि |

इ. पाठं पठित्वा एतानि वाक्यानि समुचितरुपेण पुनर्लिखन्तु।

१. अत्र वृक्षाः विरलाः। परन्तु जलपातः अधिकः।

२. दुर्गन्धः नासिकां सन्तोषयति।

३. कोयजातीयाः सिंहाचलपरिसरे, प्राक्गोदावरीमण्डले न्यूनतया निवसन्ति।

४. नगरवासिनाम् अस्माकं गिरयः, तरवः, झर्यः जलस्थानानि च देवतारूपाणि भवन्ति।

५. वनेचराः भवन्तः स्वास्थ्यसंरक्षणाय व्यायामशालां गत्वा बहुश्रमं कुर्वन्ति।

६. प्रवाहजलेषु व्यर्थवस्तुजातं पातयामः।

SCERT TELANGANA

ई. पाठे आगतानि देवालयानां नामानि, तेषां प्रदेशान् पट्टिकारूपेण लिखन्तु।

| देवालयः | प्रदेशः |
| --- | --- |
| | |

उ. गिरिजनाः अरण्येषु केषां वस्तूनां सञ्चयनं कुर्वन्ति इति एकां सूचीं लिखन्तु।

ऊ. अधः दत्तानि वाक्यानि पठन्तु। तत्समानार्थकवाक्यानि पाठे अन्विष्य लिखन्तु।

1. మాకు కొండలు చెట్లు, ప్రవాహాలు, నీటిప్రాంతాలు నమస్కరింపదగిన రూపాలు.
2. నీ ఆరోగ్యరహస్యం చెప్పు.
3. అడవి చెట్లమందులతో, వ్యాధులు నయంచేసుకోవడం. ఆరోగ్యాన్ని కాపాడుకోవడం చేస్తున్నారు.

## ३. लेखनं, स्वीयरचना



अ. पठन्तु, लिखन्तु

१. कोयदोरस्य नाम किम्? सः कस्य प्रान्तस्य निवासी?
२. वनेचराणाम् आवासः, आरोग्यपरिरक्षणं च कथं वर्तते?
३. गिरिजनाः प्रकृतिं कथम् आराधयन्ति।
४. राजधान्यां जीवनविषये कोयदोरः किमुक्तवान्?
५. वनेचराः अरण्यतः कानि कानि संगृह्णन्ति?



चिन्तयन्तु, लिखन्तु

१. गिरिजनाः प्रकृतेः आराधकाः इति कथं वक्तुं शक्यते?
२. वार्ताहराः किं किं कुर्वन्ति?
३. नगरजनाः गिरिजनेभ्यः किं किं स्वीकुर्युः?
४. नगरजनैः गिरिजनेभ्यः कानि देयानि?
५. वस्तुविनिमयः नाम किम्?
६. गिरिजनाः अरण्योत्पादकानि वस्तूनि आधारीकृत्य जीवन्ति। पाठे कानिचन वस्तूनि सन्ति। तानि अतिरिच्य केषाञ्चन वस्तूनां नामानि लिखन्तु।

SCERT TELANGANA

७. अत्र नगर/ग्राम/गिरिजनशैली कथं वर्तते इति पट्टिकानुसारं लेखनपुस्तिकायां लिखन्तु।

| | नगरशैली | ग्रामशैली | गिरिजनशैली |
|---|---|---|---|
| जीवनवृत्तिः | | | |
| वातावरणम् | | | |
| आहारः | | | |
| वस्त्रधारणम् | | | |

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. रेखाङ्कितपदानि उपयुज्य वाक्यानि लिखन्तु।

१. सर्वे मिलित्वा वनदेवताम् आराधयन्ति।
२. व्यायामं विनापि भवान् तु स्वस्थः दृश्यते।
३. विनोदार्थमपि जन्तुहिंसां न कुर्मः।
४. भवन्तः आहारं कथं सम्पादयन्ति?
५. व्यायामशालां गत्वा बहुश्रमं कुर्मः।

### आ. एतेषु एकैकस्य उपयोगं लिखन्तु।

१. मधु  - ..................................
२. फेनिलम्  - ..................................
३. तिन्त्रिणी  - ..................................
४. आमलकम्  - ..................................
५. चर्मसाह्वा  - ..................................

### इ. रेखाङ्कितानां पदानां व्यतिरेकपदं लिखन्तु। तानि व्यतिरेकपदानि उपयुज्य नूतनवाक्यानि रचयन्तु।

१. सूर्यातपः तीक्ष्णः अस्ति।
२. बहु धनं स्वीकृत्य अल्पम् एव आहारं यच्छन्ति।
३. स्वयं पर्णशालाः निर्माय सामूहिकजीवनं कुर्वन्ति।
४. प्रकृतेः आराधकाः वयं स्वस्थाः भवामः।

SCERT TELANGANA

ई. जातीयः इति पदम् उपयुज्य अन्यपदानि लिखन्तु।

**उदा - स्वजातीयः** ................. ................ ................
................. ................ ................
................. ................ ................

उ. अधः दत्तानि पदानि उपयुज्य वाक्यानि रचयन्तु।

१. आहारपदार्थाः    २. आत्मसंरक्षणम्    ३. जीवनशैली
४. व्यायामशाला    ५. सूर्यातपः    ६. विनोदार्थम्

## ५. व्याकरणांशाः



अ. अधः दत्तानि वाक्यानि पठन्तु। रेखाङ्कितपदानि अवगच्छन्तु। एतानि पञ्चमीविभक्तेः पदानि।

रघुरामः पाठशालायाः गृहम् आगतवान्। तस्य पिता कार्यालयात् आगच्छति।
प्रातः तस्य माता आपणात् फलानि आनीतवती।
प्रातः मञ्जूषायाः पुस्तकम् आनीय दत्तवती।
रघुरामस्य अनुजा खेलनार्थं गृहात् बहिर्गतवती।

आ. एतानि पदानि अवगच्छन्तु।

पाठशाला - पाठशालायाः,    कार्यालयः - कार्यालयात्
आपणकेन्द्रम् - आपणकेन्द्रात्,    मञ्जूषा - मञ्जूषायाः
गृहम् - गृहात्

इ. अधः दत्तानां पदानां पञ्चमीविभक्तिरूपाणि लिखन्तु।

१. वृक्षः - ....................    २. कूपः - ....................
३. बिडालः - ....................    ४. शाखा - ....................
५. नदी - ....................    ६. अम्बा - ....................
७. मन्दिरम् - ....................    ८. जलम् -. ....................
९. शीतम् - ....................

ई. कुण्डल्यां सूचितपदस्य पञ्चमीविभक्तिरूपं लिखन्तु।

एकः मूषकः.......................... (काकमुखम्) भूमौ पतितः। सः.................... (कुक्कुरः) भीतः।.................... (भूमिः) बिलं प्रविष्टः।.................... (बिलम्) पुनः पुनः दृष्टवान्।.................... (गृहम्) बालकः दण्डेन सह आगच्छति। कुक्कुरः.................... (दण्डः) भीतः। .................... (तत्) निर्गतवान्।

SCERT TELANGANA

उ. अधः दत्तानि पञ्चमीविभक्तेः रूपाणि पठन्तु।

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| पाठशालायाः | पाठशालाभ्याम् | पाठशालाभ्यः |
| केन्द्रात् | केन्द्राभ्याम् | केन्द्रेभ्यः |
| वृक्षात् | वृक्षाभ्याम् | वृक्षेभ्यः |
| शाखायाः | शाखाभ्याम् | शाखाभ्यः |
| नद्याः | नदीभ्याम् | नदीभ्यः |
| शीतात् | शीताभ्याम् | शीतेभ्यः |
| तस्मात् | ताभ्याम् | तेभ्यः |
| तस्याः | ताभ्याम् | ताभ्यः |

ऊ. अत्र कानिचन समासपदानि, तेषां विग्रहवाक्यानि च दत्तानि सन्ति। तानि पठन्तु, अवगच्छन्तु।

१. आवासकल्पनम् - आवासस्य कल्पनम्
२. जनसङ्कीर्णाः - जनैः सङ्कीर्णाः
३. वाहनपूर्णाः - वाहनैः पूर्णाः
४. सूर्यातपः - सूर्यस्य आतपः
५. जलस्थानानि - जलस्य स्थानानि
६. वस्तुविनिमयः - वस्तूनां विनिमयः
७. आरोग्यपरिरक्षणम् - आरोग्यस्य परिरक्षणम्
८. प्रकृतिसमतौल्यम् - प्रकृतेः समतौल्यम्
९. गिरिजनसंस्कृतिः - गिरिजनानां संस्कृतिः

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. "वनेचरः" इति पाठम् आधारीकृत्य एकं लेखं मित्रं प्रति लिखन्तु।

SCERT TELANGANA

## ७. परियोजनाकार्यम्



अ. अस्माकं राज्ये गिरिजनाः विविधाः विविधप्रदेशेषु निवसन्ति। तेषाम् आवासप्रान्ताः, वेषभाषाः, आहारसम्पादनम्, वृत्तयः, सम्प्रदायाः इत्यादीन् अंशान् सङ्कलय्य भित्तिपत्रैः प्रदर्शयन्तु।

## ८. प्रशंसा।



शङ्करः - जगपते! अद्य वार्तापत्रिकां पठितवान् वा?

जगपतिः - कः विशेषः?

शङ्करः - अत्र एकः गिरिजनः तेषां स्वच्छजीवनम् उद्दिश्य उक्तवान्। भवान् एव पठतु।

जगपतिः - (दृष्ट्वा) भोः! मित्र! गतदिनपत्रिकायां तैः आधुनिकवैद्यं सम्यक्तया न लभ्यते इति प्रकाशितम्। मम हृदयं खिन्नम् अभवत्।

शङ्करः - नूतनवैद्याः अवश्यं द्वित्राणि वर्षाणि एतादृशप्रान्तेषु सेवां कुर्युः इति इदानीं शासकाः नियमं कल्पयन्ति।

जगपतिः - उत्तमम्।

(निर्धनानां कृते निःशुल्कवैद्यं कृतवन्तं भिषजं भवान्/भवती कथम् अभिनन्दति।)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. गिरिजनानां विषये किञ्चित् वक्तुं शक्नोमि। | | | |
| ३. 'गिरिजनाः प्रकृतेः आराधकाः' इति विषये पञ्चवाक्यानि लेखितुं शक्नोमि । | | | |
| ४. पाठम् आधारीकृत्य मित्रं प्रति लेखं लेखितुं शक्नोमि । | | | |




SCERT TELANGANA

चतुर्थभागः

चतुर्दशः पाठः

# १४. सुभाषितानि

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. सिंहः निद्रायां कीदृशं स्वप्नं पश्यति?

२. चित्रं दृष्ट्वा भवन्तः किम् अनुभवन्ति?

**पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।**

१. **वस्त्रेण वपुषा वाचा विद्यया विनयेन च।**
**वकारैः पञ्चभिर्हीनः वासवोऽपि न पूज्यते।।**



**प्रतिपदार्थः**

| | | |
|---|---|---|
| वस्त्रेण | - | వస్త్రం చేత |
| वपुषा | - | (ఆరోగ్యవంతమైన) శరీరాకృతి చేత |
| वाचा | - | చక్కని మాటచేత |
| विद्यया | - | విద్య చేత |
| विनयेन | - | వినయం చేత |
| पञ्चभिः | - | ఈ అయిదు |
| वकारैः | - | వకారాల చేత |
| हीनः | - | హీనుడు |
| वासवः अपि | - | ఇంద్రుడైనా |
| न पूज्यते | - | గౌరవం పొందడు. |



**भावः** - వస్త్రము(చక్కని వస్త్రధారణ), వపువు (ఆరోగ్యవంతమైన శరీరాకృతి), వాక్కు(మంచిమాట), విద్య, వినయం, ఈ అయిదు వకారాలూ (వకారంతో మొదలయే అంశాలు) లేనివాడు ఇంద్రుడు అయినా గౌరవం పొందడు.

२. **विद्याधनं श्रेष्ठधनं तन्मूलमितरद् धनम्।**
**दानेन वर्धते नित्यं न भाराय न नीयते।।**

**प्रतिपदार्थः**

| | | |
|---|---|---|
| विद्याधनम् | - | విద్య అనే ధనం |
| श्रेष्ठधनम् | - | శ్రేష్ఠమైన ధనం |
| तत् | - | ఆ ధనం |
| इतरत् | - | ఇతరమైన |
| धनम् | - | ధనానికి |
| मूलम् | - | ఆధారం |
| नित्यम् | - | ప్రతిరోజూ |
| दानेन | - | దానం చేయడం వల్ల |
| वर्धते | - | పెరుగుతూ ఉంటుంది |
| भाराय | - | బరువు |
| न | - | కానిది |
| न नीयते | - | తీసుకువెళ్ళలేనిది |



**भावम्** – విద్య అనేది విశిష్టమైన ధనం. ఈ విద్యాధనమే అన్ని సంపదలకూ మూలం. విద్యను దానం చేయడం వల్ల పెరుగుతూ ఉంటుంది. ఇది ఎవరికీ భారం కానిది, ఎవరూ తీసుకువెళ్ళలేనిది.

SCERT TELANGANA

३. **जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।**
**स हेतुस्सर्वविद्यानां धर्मस्य च धनस्य च ॥**



**प्रतिपदार्थः**

जलबिन्दु - నీటిబిందువులు
निपातेन - పడటం వల్ల
क्रमशः - క్రమంగా
घटः - కుండ
पूर्यते - నిండుతుంది.
सः - ఆ క్రమవిధానమే
सर्वविद्यानाम् - అన్ని విద్యలకూ
धर्मस्य च - ధర్మసాధనకూ
हेतुः - కారణం

**भावः** - ఒకొక్క నీటిబొట్టు పడటం చేత కుండ క్రమక్రమంగా నీటితో నిండుతుంది. అదే విధంగా అన్ని విద్యలను, ధర్మాన్ని, ధనాన్ని క్రమంగా సంపాదించుకోవాలి.



४. **भीतेभ्यश्चाभयं देयं व्याधितेभ्यस्तथौषधम्।**
**देया विद्यार्थिनां विद्या देयमन्नं क्षुधाऽर्थिनाम्॥**

**प्रतिपदार्थः**

भीतेभ्यः च - భయపడినవాళ్ళకు
अभयम् - అభయాన్ని
देयम् - ఇవ్వాలి
तथा - అలాగే
व्याधितेभ्यः - రోగులకు
औषधम् - ఔషధాన్ని
देयम् - ఇవ్వాలి
विद्यार्थिनां - విద్యార్థులకు
विद्या - విద్యను
देया - ఇవ్వాలి
क्षुधार्थिनाम् - ఆకలితో ఉన్నవారికి
अन्नम् - అన్నం
देयम् - పెట్టాలి

**भावः** - భయంతో ఉన్నవారికి అభయాన్ని, రోగులకు మందును, విద్యార్థులకు చదువును ఇవ్వాలి. అలాగే ఆకలైన వారికి అన్నం పెట్టాలి.

SCERT TELANGANA

५. यथा बीजं विना क्षेत्रमुप्तं भवति निष्फलम्।
तथा पुरुषकारेण विना दैवं न सिध्यति॥

**प्रतिपदार्थः**

| | | |
|---|---|---|
| उप्तम् | - | దున్నిన |
| क्षेत्रम् | - | పొలం |
| बीजम् | - | విత్తనం |
| विना | - | లేకుండా |
| यथा | - | ఎలాగైతే |
| निष्फलम् | - | ఫలం లేనిదై |
| भवति | - | ఉంటుందో |
| तथा | - | అలాగే |
| पुरुषकारेण | - | మానవప్రయత్నం లేకుండా |
| दैवम् | - | అదృష్టం |
| न सिध्यति | - | వరించదు |





**भावः** - దున్నిన తరువాత విత్తనాలు వేయని పొలం పండదు. అలాగే మానవప్రయత్నం లేనిచోట అదృష్టమూ వరించదు.

६. दुःखं ददाति योऽन्यस्य ध्रुवं दुःखं स विन्दति।
तस्मान्न कस्यचित् दुःखं दातव्यं दुःखभीरुणा॥



**प्रतिपदार्थः**

| | | |
|---|---|---|
| यः | - | ఎవడైతే |
| अन्यस्य | - | ఇతరులకు |
| दुःखं | - | దుఃఖాన్ని |
| ददाति | - | కలిగిస్తాడో |
| सः | - | అతడు |
| ध्रुवम् | - | తప్పకుండా |
| दुःखम् | - | దుఃఖాన్ని |
| विन्दति | - | పొందుచున్నాడు |
| तस्मात् | - | అందువల్ల |
| दुःखभीरुणा | - | దుఃఖమంటే భయపడేవాడు |
| कस्यचित् | - | ఎవరికీ |
| दुःखम् | - | దుఃఖాన్ని |
| न दातव्यम् | - | కలిగించకూడదు |

**भावः** - ఇతరులకు దుఃఖాన్ని కల్గించేవాళ్ళు తప్పకుండా దుఃఖాన్ని పొందుతారు. కాబట్టి దుఃఖాన్ని పొందకూడదనుకున్నవాళ్ళు పరులకు దుఃఖాన్ని కలిగించకూడదు.

SCERT TELANGANA

७. **एकः स्वादु न भुञ्जीत एकश्चार्थान्नचिन्तयेत्।**
**एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात्॥**



**प्रतिपदार्थः**

एकः - ఒకడు/ఒంటరిగా
स्वादु - రుచికరమైన వాటిని
न भुञ्जीत - తినకూడదు
एकः - ఒకడు/ఒంటరిగా
अर्थान् - ప్రయోజనములను
च - కూడా
न चिन्तयेत् - ఆలోచించకూడదు.
एकः - ఒకడే/ఒంటరిగా
अध्वानम् - దారిలో
न गच्छेत् - వెళ్ళకూడదు
सुप्तेषु - అందరూ నిద్రపోతూ ఉన్నప్పుడు
एकः - ఒక్కడే/ఒంటరిగా
न जागृयात् - మేల్కొని ఉండకూడదు

**भावः** - రుచికరమైన వాటిని ఒక్కడే తినకూడదు. ప్రయోజనం కలిగించే ఏ విషయాన్నయినా ఒక్కడే ఆలోచించకూడదు. ఒంటరిగా ప్రయాణించకూడదు. అందరూ నిద్రపోతూ ఉన్నప్పుడు ఒక్కడే మేల్కొని ఉండకూడదు.

८. **परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।**
**वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्॥**



**प्रतिपदार्थः**

प्रत्यक्षे - ఎదుట
प्रियवादिनम् - తీయని మాటలు చెప్పేవాడూ
परोक्षे - పక్కకు పోయి
कार्यहन्तारम् - పనిని చెడగొట్టే వాడూ
पयोमुखम् - పైకి పాలలా స్వచ్ఛంగా కనిపించేవాడు
विषकुम्भम् - లోపల విషాన్ని దాచుకున్న కుండ వంటివాడూ
तादृशं मित्रम् - అటువంటి మిత్రుణ్ణి
वर्जयेत् - వదిలిపెట్టాలి.

**भावः** - స్వార్థపరుడై ఎదుట ఉన్నప్పుడు తీయని మాటలు చెబుతూ, చాటున పనులు చెడగొట్టేవాడూ, పైకి పాలలాగా స్వచ్ఛంగా కనిపిస్తూ, లోపల విషమున్న కుండలాంటివాడూ అయిన మిత్రుణ్ణి వెంటనే వదిలిపెట్టాలి.

SCERT TELANGANA

१. परोऽपि हितवान् बन्धुः बन्धुरप्यहितः परः।
अहितो देहजो व्याधिः हितमारण्यमौषधम्॥



**प्रतिपदार्थः**

हितवान् - మన మేలు గోరేవాడు
परः अपि - పరాయివాడే అయినా కూడా
बन्धुः - మనకు బంధువు
अहितः - మేలు కోరని
बन्धुः अपि - బంధువు కూడా
परः - పరాయి వాడే
देहजः - మన శరీరం నుంచే పుట్టినా
व्याधिः - జబ్బు
अहितः - మనకు మేలు చేసేది కాదు
आरण्यम् - అడవిలోని
औषधम् - ఔషధం
हितम् - మనకు మేలు చేస్తుంది

**भावः** - మనకు మేలు చేసేవాడు పరాయివాడు అయినా అతడే మన బంధువు. మేలు కోరని వాడు బంధువే అయినా పరాయివాడే. ఎలాగంటే మన శరీరంలోనే వ్యాధి పుడుతుంది. అయినా అది మనకు మేలు చేసేది కాదు. అడవిలో ఉన్నదే అయినా ఔషధం మనకు మేలు చేస్తుంది గదా!



## एतानि कुर्वन्तु



### १. श्रृण्वन्तु, विचिन्त्य वदन्तु

अ. पाठस्य चित्राणि दृष्ट्वा किं ज्ञातवन्तः?
आ. श्लोकाः अस्मान् किं पाठयन्ति?
इ. एतेषु कः श्लोकः भवताम् इष्टः भवति? किमर्थम् ?

## २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



**अ. एतेषां श्लोकपादानां भावं जानन्तु। ते भावाः समुचिताः वा न वा इति वदन्तु।**

१. दुःखं दातव्यं दुःखभीरुणा।

२. व्याधिः हितकारी भवति परस्य।

३. परोक्षे कार्यविनाशकमित्रं त्यजेत्।

४. पिपासार्थिनाम् अन्नं देयम्।

**आ. अधः दत्तानि वाक्यानि पठन्तु। तत्समानार्थकानि संस्कृतवाक्यानि पाठे अन्विष्य लिखन्तु।**

१. ఇంద్రుడైనా పూజింపబడడు.

२. ఒంటరిగా ఏదీ ఆలోచించకు.

३. ఎక్కడివాడో అయినా ఆదుకున్నవాడే బంధువు.

४. భయపడినవారిని ఓదార్చి భయం లేకుండా చేయాలి.

## ३. लेखनं, स्वीयरचना



**अ. पठन्तु, लिखन्तु**

१. लोके कैः हीनः गौरवं न प्राप्नोति?

२. दैवं कदा सिध्यति?

३. कः दुःखं विन्दति?

४. विद्या, धनं, धर्मः च केन प्रकारेण सम्पादनीयाः?



**आ. चिन्तयन्तु, लिखन्तु**

१. ''एकः न गच्छेत् अध्वानम्'' इति श्लोके अस्ति। यदि एकः गच्छति चेत् किं भवति?

२. विद्या कीदृशी?

३. बन्धुः नाम कः?

४. अकस्मात् धनम् अधिकं प्राप्यते चेत् तेन किं करिष्यन्ति?

SCERT TELANGANA

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



**अ. अत्र दत्तानां पदानां सम्बद्धपदानि लिखन्तु। तानि उपयुज्य वाक्यान्यपि लिखन्तु।**




**उदा - कृषकः क्षेत्रं कर्षति।**

१. ........................................
२. ........................................
३. ........................................
४. ........................................
५. ........................................
६. ........................................

**आ. अधः दत्तानि पदानि उपयुज्य स्वीयवाक्यानि लिखन्तु।**

१. क्रमशः     २. श्रेष्ठधनम्     ३. क्षुधार्थी
४. विद्याधनम्     ५. प्रियवादी     ६. अहितम्

## ५. व्याकरणांशाः



**अ. अधः दत्तानि क्रियापदानि आत्मनेपदिनः सन्ति।**

**वृधु-वृध्दौ**   वर्तमाने लट्

| | | |
|---|---|---|
| वर्धते | वधेते | वर्धन्ते |
| वर्धसे | वर्धेथे | वर्धध्वे |
| वर्धे | वर्धावहे | वर्धामहे |

इत्थमेव एधते, कुरुते, शिक्षते, इत्यादिरूपाणि भवन्ति।

**आ. अत्र दत्तानि वाक्यानि अवगच्छन्तु।**

१. भवतां समीपे यावत् धनम् अस्ति तावत् धनं मम समीपे नास्ति।
२. समुद्रे यावत् जलं भवति तावत् जलं नद्यां न भवति।

☞ एवं परिमाणस्य तोलनाय ''यावत्-तावत्'' इति अव्ययद्वयम् उपकरोति।

**इ. अत्र दत्तनि पदानि 'यावत्-तावत्' च उपयज्य वाक्यानि रचयन्तु।**

१. दूरम्     २. वित्तम्     ३. ज्ञानम्     ४. जलम्     ५. सुखम्
६. दुःखम्     ७. वैशाल्यम्     ८. मधुरम्     ९. विज्ञानम्     १०. सस्यम्

SCERT TELANGANA

## ६. सर्जनात्मकव्यक्तीकरणम्



**अ. पाठे एकैकस्य श्लोकस्य चित्राणि सन्ति। तेषां चित्राणाम् आधारेण यावच्छक्यं कथाः, सङ्घटनानि, लेखं वा लिखन्तु। तेषां सम्भाषणरूपं कल्पयन्तु।**

| | | |
|---|---|---|
| १. वस्त्रेण..........न पूज्यते। | - | कथा |
| २. यथा बीजम् ......... न सिध्यति। | - | सम्भाषणम् |
| ३. एकः स्वादु.......... जागृयात् | - | लेखं लिखन्तु |
| ४. परोक्षे......... पयो मुखम्। | - | पिता पुत्रस्य लेखनम् |
| ५. परोऽपि हितवान्........ औषधम् | - | सङ्घटनम् |

**आ. एतस्य श्लोकस्य प्रतिपदार्थानुगुणं पदानाम् अन्वयक्रमं लिखन्तु।**

विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।।

## ७. परियोजनाकार्यम्



**महापुरुषाणां जीवनघटनाः सङ्कलय्य कक्ष्यायां, प्रार्थनासभायां वा श्रावयतु।**

## ८. प्रशंसा



सुरेशः - आचार्य! डा।। अम्बेड्कर् महोदयः अनेकपदवीः आर्जितवान् इति पाठे पठितम्। किं सः धनिकः आसीत्?

अध्यापकः - न, बाल्ये सः निर्धनः एव आसीत्। परन्तु स्वीयपरिश्रमेण विद्याम् आर्जितवान्। क्रमेण राज्याङ्गरचयितृसमित्याः अध्यक्षः अभवत् सः। भवानपि पाठशालां नियतरूपेण आगच्छेत्। तदा भवानपि विद्यां सम्यक् आर्जयितुं शक्नोति।

सुरेशः - तथैव आचार्य! धन्यवादः।

(निर्धनाय मित्राय विद्याभ्यासार्थं भवान् कथं सहकरोति ।)



**स्वीयमूल्याङ्कनम्**



| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. श्लोकान् अदृष्ट्वा वक्तुं शक्नोमि । | | | |
| २. सुभाषितवाक्यानि वक्तुं शक्नोमि । | | | |
| ३. श्लोकभावान् स्वीयवाक्यैः लेखितुं शक्नोमि । | | | |
| ४. प्रतिपदार्थरचनां कर्तुं शक्नोमि । | | | |

SCERT TELANGANA

# करणीया दीनानां सेवा



महर्षिः रमणः परमविरक्तः तपस्वी। धर्मशास्त्राणाम् अध्ययनेन सः सङ्कल्पं कृतवान् यत् मया आवश्यकतायाः अधिकं वस्तु न सङ्ग्रहणीयम् इति। सत्सङ्गाय आगतवतः जनान् अपि सः उपदिशति स्म - ''यावती आवश्यकता स्यात् तावत् एव यः सङ्गृह्णीयात्। सः एव जनः सुखी भवेत्'' इति।

महर्षेः सकाशे एकम् एव कौपीनम् आसीत्। स्नानानन्तरं सः तत् कौपीनम् आतपे प्रसारयति स्म। तत् यदा शुष्कं भवेत् तदा सः तत् धरति स्म। कस्माच्चित् अपि किमपि न गृहीतव्यम् इति व्रतम् आसीत् तस्य।

एकदा महर्षेः कौपीनं गुल्मस्य कण्टकैः शीर्णम् अभवत्। सः कुटीरे शिलापट्टे उपविश्य कौपीनं सीव्यन् आसीत्। तावता तस्य परमाः भक्ताः धनिकाः तत्कुटीरं प्राप्तवन्तः। ते तस्य जीर्णस्य शीर्णस्य कौपीनस्य सीवनं कुर्वन्तं महर्षिं दृष्ट्वा नितरां खिन्नाः। अञ्जलिं बद्ध्वा ते प्रार्थितवन्तः -

''महाशय! एतत् कौपीनं शीर्णम् अस्ति। यदि भवान् अस्मान् आदिशेत् तर्हि भवते एकं नूतनं कौपीनं दद्याम वयम्।''

महर्षिः एतत् श्रुत्वा स्मितपूर्वकं प्रेम्णा उक्तवान् - ''भवन्तः कौपीनं मह्यं न दद्युः इति न। किन्तु किं तेन ? पुरतः दृश्यताम्। तत्र बालकाः शीतेन कम्पमानाः सन्ति। मत्परिसरे एतादृशाः असङ्ख्याः जनाः सन्ति, ये च शैत्येन कम्पमानाः रात्रिं यापयन्ति। यदि भवन्तः एकस्मै जनाय अपि वस्त्रं दद्युः तर्हि मया एव वस्त्रं प्राप्तम् इव'' इति।

भक्ताः आश्चर्येण तस्य मुखं पश्यन्तः अतिष्ठन्। महर्षिः क्षणं विरम्य तान् पुनः उक्तवान् - ''प्रियभक्ताः! दीनेषु दरिद्रेषु च भवन्तः भगवन्तं पश्यन्तु। एषः एव अस्माकं धर्मशास्त्राणां सारः''।।

भक्ताः धनिकाः तम् उपदेशं मनसा गृहीत्वा दरिद्राणां दीनानां च सेवायै स्वकीयं जीवनम् अर्पितवन्तः।

SCERT TELANGANA

# शब्दाः

## इकारान्तः पुंलिङ्गः हरिशब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | हरिः | हरी | हरयः |
| सम्बोधनप्रथमा विभक्तिः | हे हरे | हे हरी | हे हरयः |
| द्वितीया विभक्तिः | हरिम् | हरी | हरीन् |
| तृतीया विभक्तिः | हरिणा | हरिभ्याम् | हरिभिः |
| चतुर्थी विभक्तिः | हरये | हरिभ्याम् | हरिभ्यः |
| पञ्चमी विभक्तिः | हरेः | हरिभ्याम् | हरिभ्यः |
| षष्ठी विभक्तिः | हरेः | हर्योः | हरीणाम् |
| सप्तमी विभक्तिः | हरौ | हर्योः | हरिषु |

एवं कविः, रविः, कपिः, गिरिः इत्यादयः।

## उकारान्तः पुंलिङ्गः गुरुशब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | गुरुः | गुरू | गुरवः |
| सम्बोधनप्रथमा विभक्तिः | हे गुरो | हे गुरू | हे गुरवः |
| द्वितीया विभक्तिः | गुरुम् | गुरू | गुरून् |
| तृतीया विभक्तिः | गुरुणा | गुरुभ्याम् | गुरुभिः |
| चतुर्थी विभक्तिः | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| पञ्चमी विभक्तिः | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| षष्ठी विभक्तिः | गुरोः | गुर्वोः | गुरूणाम् |
| सप्तमी विभक्तिः | गुरौ | गुर्वोः | गुरुषु |

एवं शम्भुः, शिशुः, विष्णुः, तरुः इत्यादयः।

SCERT TELANGANA

## ऋकारान्तः पुंलिङ्गः पितृशब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | पिता | पितरौ | पितरः |
| सम्बोधनप्रथमा विभक्तिः | हे पितः | हे पितरौ | हे पितरः |
| द्वितीया विभक्तिः | पितरम् | पितरौ | पितॄन् |
| तृतीया विभक्तिः | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी विभक्तिः | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी विभक्तिः | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी विभक्तिः | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी विभक्तिः | पितरि | पित्रोः | पितृषु |

एवं दाता, भ्राता इत्यादयः।

## इकारान्तः स्त्रीलिङ्गः मतिशब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | मतिः | मती | मतयः |
| सम्बोधनप्रथमा विभक्तिः | हे मते | हे मती | हे मतयः |
| द्वितीया विभक्तिः | मतिम् | मती | मतीः |
| तृतीया विभक्तिः | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी विभक्तिः | मत्यै/मतये | मतिभ्याम् | मतिभ्यः |
| पञ्चमी विभक्तिः | मत्याः/मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी विभक्तिः | मत्याः/मतेः | मत्योः | मतीनाम् |
| सप्तमी विभक्तिः | मत्याम्/मतौ | मत्योः | मतिषु |

एवं श्रुतिः, कीर्तिः, कृतिः, धृतिः, प्रकृतिः, भक्तिः इत्यादयः।

SCERT TELANGANA

## उकारान्तः स्त्रीलिङ्गः धेनुशब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | धेनुः | धेनू | धेनवः |
| सम्बोधनप्रथमा विभक्तिः | हे धेनो | हे धेनू | हे धेनवः |
| द्वितीया विभक्तिः | धेनुम् | धेनू | धेनूः |
| तृतीया विभक्तिः | धेन्वा | धेनुभ्याम् | धेनुभिः |
| चतुर्थी विभक्तिः | धेन्वै/धेनवे | धेनुभ्याम् | धेनुभ्यः |
| पञ्चमी विभक्तिः | धेन्वाः/धेनोः | धेनुभ्याम् | धेनुभ्यः |
| षष्ठी विभक्तिः | धेन्वाः/धेनोः | धेन्वोः | धेनूनाम् |
| सप्तमी विभक्तिः | धेन्वाम्/धेनौ | धेन्वोः | धेनुषु |

एवं तनुः, रेणुः, रज्जुः इत्यादयः।

## ऋकारान्तः स्त्रीलिङ्गः मातृशब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | माता | मातरौ | मातरः |
| सम्बोधनप्रथमा विभक्तिः | हे मातः | हे मातरौ | हे मातरः |
| द्वितीया विभक्तिः | मातरम् | मातरौ | मातॄः |
| तृतीया विभक्तिः | मात्रा | मातृभ्याम् | मातृभिः |
| चतुर्थी विभक्तिः | मात्रे | मातृभ्याम् | मातृभ्यः |
| पञ्चमी विभक्तिः | मातुः | मातृभ्याम् | मातृभ्यः |
| षष्ठी विभक्तिः | मातुः | मात्रोः | मातॄणाम् |
| सप्तमी विभक्तिः | मातरि | मात्रोः | मातृषु |

एवं याता, ननन्दा, दुहिता इत्यादयः।

SCERT TELANGANA

## इकारान्तः नपुंसकलिङ्गः वारिशब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | वारि | वारिणी | वारीणि |
| सम्बोधनप्रथमा विभक्तिः | हे वारे/हे वारि | हे वारिणी | हे वारीणि |
| द्वितीया विभक्तिः | वारि | वारिणी | वारीणि |
| तृतीया विभक्तिः | वारिणा | वारिभ्याम् | वारिभिः |
| चतुर्थी विभक्तिः | वारिणे | वारिभ्याम् | वारिभ्यः |
| पञ्चमी विभक्तिः | वारिणः | वारिभ्याम् | वारिभ्यः |
| षष्ठी विभक्तिः | वारिणः | वारिणोः | वारीणाम् |
| सप्तमी विभक्तिः | वारिणि | वारिणोः | वारिषु |

एवं दधि, शुचि इत्यादयः।

★ ★ ★




SCERT TELANGANA

# धातवः

## दृशिर् - प्रेक्षणे

### वर्तमाने लट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पश्यति | पश्यतः | पश्यन्ति |
| मध्यमपुरुषः | पश्यसि | पश्यथः | पश्यथ |
| उत्तमपुरुषः | पश्यामि | पश्यावः | पश्यामः |

### भविष्यति लृट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | द्रक्ष्यति | द्रक्ष्यतः | द्रक्ष्यन्ति |
| मध्यमपुरुषः | द्रक्ष्यसि | द्रक्ष्यथः | द्रक्ष्यथ |
| उत्तमपुरुषः | द्रक्ष्यामि | द्रक्ष्यावः | द्रक्ष्यामः |

### विध्याशिषोः लोट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पश्यतु / पश्यतात् | पश्यताम् | पश्यन्तु |
| मध्यमपुरुषः | पश्य / पश्यतात् | पश्यतम् | पश्यत |
| उत्तमपुरुषः | पश्यानि | पश्याव | पश्याम |

### अनद्यतनभूते लङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपश्यत् | अपश्यताम् | अपश्यन् |
| मध्यमपुरुषः | अपश्यः | अपश्यतम् | अपश्यत |
| उत्तमपुरुषः | अपश्यम् | अपश्याव | अपश्याम |

## गम्लृ - गतौ

### वर्तमाने लट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छति | गच्छतः | गच्छन्ति |
| मध्यमपुरुषः | गच्छसि | गच्छथः | गच्छथ |
| उत्तमपुरुषः | गच्छामि | गच्छावः | गच्छामः |

### भविष्यति लृट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यमपुरुषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तमपुरुषः | गमिष्यामि | गमिष्यावः | गमिष्यामः |

### विध्याशिषोः लोट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छतु / गच्छतात् | गच्छताम् | गच्छन्तु |
| मध्यमपुरुषः | गच्छ / गच्छतात् | गच्छतम् | गच्छत |
| उत्तमपुरुषः | गच्छानि | गच्छाव | गच्छाम |

### अनद्यतनभूते लङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अगच्छत् | अगच्छताम् | अगच्छन् |
| मध्यमपुरुषः | अगच्छः | अगच्छतम् | अगच्छत |
| उत्तमपुरुषः | अगच्छम् | अगच्छाव | अगच्छाम |

SCERT TELANGANA

## लिख - लेखने

### वर्तमाने लट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लिखति | लिखतः | लिखन्ति |
| मध्यमपुरुषः | लिखसि | लिखथः | लिखथ |
| उत्तमपुरुषः | लिखामि | लिखावः | लिखामः |

### भविष्यति लृट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लेखिष्यति | लेखिष्यतः | लेखिष्यन्ति |
| मध्यमपुरुषः | लेखिष्यसि | लेखिष्यथः | लेखिष्यथ |
| उत्तमपुरुषः | लेखिष्यामि | लेखिष्यावः | लेखिष्यामः |

### विध्याशिषोः लोट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लिखतु / लिखतात् | लिखताम् | लिखन्तु |
| मध्यमपुरुषः | लिख / लिखतात् | लिखतम् | लिखत |
| उत्तमपुरुषः | लिखानि | लिखाव | लिखाम |

### अनद्यतनभूते लङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अलिखत् | अलिखताम् | अलिखन् |
| मध्यमपुरुषः | अलिखः | अलिखतम् | अलिखत |
| उत्तमपुरुषः | अलिखम् | अलिखाव | अलिखाम |

## नीञ् - प्रापणे

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| नयति | नयतः | नयन्ति |
| नयसि | नयथः | नयथ |
| नयामि | नयावः | नयामः |

### भविष्यति लृट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| नेष्यति | नेष्यतः | नेष्यन्ति |
| नेष्यसि | नेष्यथः | नेष्यथ |
| नेष्यामि | नेष्यावः | नेष्यामः |

### विध्याशिषोः लोट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| नयतु / नयतात् | नयताम् | नयन्तु |
| नय / नयतात् | नयतम् | नयत |
| नयानि | नयाव | नयाम |

### अनद्यतनभूते लङ्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| अगच्छत् | अगच्छताम् | अगच्छन् |
| अगच्छः | अगच्छतम् | अगच्छत |
| अगच्छम् | अगच्छाव | अगच्छाम |

SCERT TELANGANA

## पा - पाने

### वर्तमाने लट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पिबति | पिबतः | पिबन्ति |
| मध्यमपुरुषः | पिबसि | पिबथः | पिबथ |
| उत्तमपुरुषः | पिबामि | पिबावः | पिबामः |

### भविष्यति लृट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पास्यति | पास्यतः | पास्यन्ति |
| मध्यमपुरुषः | पास्यसि | पास्यथः | पास्यथ |
| उत्तमपुरुषः | पास्यामि | पास्यावः | पास्यामः |

### विध्याशिषोः लोट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पिबतु / पिबतात् | पिबताम् | पिबन्तु |
| मध्यमपुरुषः | पिब / पिबतात् | पिबतम् | पिबत |
| उत्तमपुरुषः | पिबानि | पिबाव | पिबाम |

### अनद्यतनभूते लङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपिबत् | अपिबताम् | अपिबन् |
| मध्यमपुरुषः | अपिबः | अपिबतम् | अपिबत |
| उत्तमपुरुषः | अपिबम् | अपिबाव | अपिबाम |

## डु दाञ् - दाने

### वनर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| ददाति | दत्तः | ददति |
| ददासि | दत्थः | दत्थ |
| ददामि | दद्वः | दद्मः |

### भविष्यति लृट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| दास्यति | दास्यतः | दास्यन्ति |
| दास्यसि | दास्यथः | दास्यथ |
| दास्यामि | दास्यावः | दस्यामः |

### विध्याशिषोः लोट्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| ददातु / दत्तात् | दत्ताम् | ददतु |
| देहि / दत्तात् | दत्तम् | दत्त |
| ददानि | ददाव | ददाम |

### अनद्यतनभूते लङ्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| अददात् | अदत्ताम् | अददुः |
| अददाः | अदत्तम् | अदत्त |
| अददाम् | अदद्व | अदद्म |

SCERT TELANGANA

# पदकोशः

### अ

अङ्गीकृत्य - అంగీకరించి
अर्जयित्वा - సంపాదించి
अटन् - తిరుగుతున్నవాడై
अतिकष्टेन - చాలా కష్టపడి
अद्यावधि - ఈ రోజువరకు
अद्वेष्टा - ద్వేషించనివాడు
अर्धदग्धशरीरः - సగం కాలిన శరీరం గలవాడు
अन्धकारजीवने - చీకటినిండిన జీవితంలో
अत्यन्तावश्यकम् - అత్యవసరము
अनागतम् - రానట్టి/రానటువంటి
अनिकेतः - నివాసం లేనివాడు
अनुचितम् - తగనిది
अनुपमम् - పోల్చుటకు వేరొకవస్తువు లేనట్టిది (విశిష్టమైనది)
अनुप्राप्य - సమీపించి
अनुभूतवती - అనుభవించింది
अनुमतानि - అనుమతించబడినవి
अन्यथा - మరొకవిధంగా
अपनीय - తొలగించి
अपहृत्य - దొంగిలించి
अभिज्ञानम् - గుర్తు
अभीष्टानि - కోరికలు
अमर्षः - ద్వేషం
अमेध्यम् - అపవిత్రమైనది
अमृष्यमाणा - సహించనిదైన
अयोध्याम् - అయోధ్యను
अवकरकण्डोलाः - చెత్తబుట్టలు
अवश्यमेव - తప్పనిసరిగా
अशोकवनिका - అశోకవనం

### आ

आक्रम्य - ఆక్రమించుకొని
आर्जितम् - సంపాదించబడిన
आर्तानाम् - దీనులకు
आदाय - తీసుకొని
आधुनिककाले - నేటికాలంలో
आनेतुम् - తెచ్చుటకు
आत्मीयभाषणम् - ఆత్మీయతతో కూడిన మాటలను
आत्मसंरक्षणम् - ఆత్మరక్షణను
आमोदितानि - అంగీకరించబడినవి
आयोजनीयाः - నిర్వహించవలసినవి
आयुर्वेदज्ञाः - ఆయుర్వేదశాస్త్రం తెలిసినవారు
आयुष्मान् भव - ఆయుష్షు కలవాడవు అగు గాక
आरोग्यप्रदः - ఆరోగ్యాన్నిచ్చేది
आरामम् - తోట
आश्वासनम् - ఓదార్పు
आवेदनपत्राणि - దరఖాస్తుపత్రాలను/ దరఖాస్తుపత్రాలు
आवश्यकम् - అవసరము
आहारपदार्थान् - ఆహారపదార్థాలను

### इ

इत्थम् - ఇట్లు
इत्यतः - అందువలన

### उ

उक्त्वा - చెప్పి

SCERT TELANGANA

उक्तवती - చెప్పింది
उचितम् - సరైన
उच्चतरमाध्यमिकविद्यालयः - ఉన్నతర మాధ్యమిక (హయ్యర్ సెకండరీ) పాఠశాలా
उच्छिष्टम् - ఎంగిలి
उदकम् - నీరు
उद्दीपयाम - వెలిగిద్దాం
उद्युक्तः - ప్రయత్నించినవాడు
उपविष्टः - కూర్చున్నాను/ కూర్చున్నాడు
उन्मत्तः - పిచ్చివాడు

ऋ

ऋजुवर्तनम् - నిజాయితీగా ఉండటం
ऋद्धि - సమృద్ధి

ए

एकमासावधिः - ఒక నెల గడువు

औ

औषधगुणाः - ఔషధగుణాలు
औषधरूपेण - ఔషధరూపంలో
औद्योगीकरणम् - పారిశ్రామీకరణం/ ఎక్కువగా పరిశ్రమలను స్థాపించుట

क

कण्टकान् - ముళ్ళను
कण्ठवेदना - గొంతునొప్పి
कथम् - ఎట్లు
कन्दम् - కాండంలో పిండి పదార్థం కలిగినది
करणीयः - చేయవలసినది
करतालध्वनिः - చప్పట్ల శబ్దము
कामरूपधारी - కోరినవేషం ధరించువాడు
कार्यसमर्थः - పనిచేయుటలో సమర్థుడు
कारणतः - కారణం వలన
कालुष्यनिवारणाय - కాలుష్యాన్ని నివారించడానికి
कुटुम्बभारः - కుటుంబము యొక్క భారం
कूर्दित्वा - దూకి
कूर्दितवती - దూకినది
कृत्वा - చేసి
कृतघ्नः - చేసిన మేలు మరచినవాడు
कृषिकार्यम् - వ్యవసాయం
कोटरम् - తొర్ర
क्लेशबहुलवीथिका - ఎన్నో దుఃఖాలతోనున్న మార్గం
क्रीडाङ्गणम् - ఆటస్థలం
किञ्चित् - కొంచెము
किञ्चिन्मात्रम् - కొంతమాత్రం
क्षतगात्रः - గాయపడిన శరీరం కలవాడు
क्षमी - క్షమాగుణం గలవాడు
क्षोभयामास - అల్లకల్లోలపరిచెను

ग

गच्छन्ती - వెళ్తూ ఉన్న
गत्वा - వెళ్ళి
गर्तः - గొయ్యి/గుంత
गतवती - వెళ్ళింది
गन्धहारिणी - సువాసననిచ్చునది
गरुत्मान् - గరుత్మంతుడు (గ్రద్ద)
गहने - అడవి యందు

SCERT TELANGANA

गहनारण्ये - భయంకరమైన అడవిలో
गिरिजनसंस्कृतिमूल्यानि - గిరిజనసంస్కృతి విలువలు
गुणोत्तमः - ఉత్తమగుణాలు కలవాడు
गुल्मेषु - పొదల యందు
गृहीत्वा - గ్రహించి
ग्रामान्तरम् - వేరొక గ్రామానికి

**घ**

घोरारण्ये - ఘోరమైన అరణ్యము నందు

**च**

चत्वरः - కూడలి
चर्मव्याधयः - చర్మవ్యాధులు
चर्मसाह्वा - సీకాకాయ
चिता - ఎంపిక చేయబడినది
चिरम् - చాలాకాలం

**छ**

छेदनसमये - తెంపునప్పుడు/ కత్తిరించునపుడు
छायावासम् - నీడకలిగిన ఆవాసమును (వసతిని)

**ज**

जनकात्मजाम् - సీతాదేవిని (జనకమహారాజు కూతురుని)
जनजीवनाय - ప్రజాజీవనానికై
जनहितम् - జనులకు మేలు
जनसङ्कीर्णाः - బాగా జనంతో నిండిన
जनसंसद् - పల్లె సభ
जलप्रदूषणम् - జలకాలుష్యము
जलस्थानानि - నీటిప్రదేశాలు
जातम् - పుట్టిన/కలిగిన
जीवनशैली - జీవనవిధానం
जीवनाधाराः - బ్రతకటానికి ఆధారాలు
ज्वालितवान् - వెలిగించెను
ज्ञात्वा - తెలుసుకొని

**झ**

झर्यः - ప్రవాహాలు/ సెలయేళ్ళు

**त**

तडागम् - నీటికొలను
तत्परः - శ్రద్ధకలిగినవాడు
तर्हि - అయితే
ताडयन् - కొడుతూ
तामसः - తమోగుణం గలవాడు
तादृशम् - అటువంటి
तावन्मात्रम् - అంతమాత్రం
तिन्त्रिणीम् - చింతకాయను
तृप्तिदम् - తృప్తినిచ్చునది
त्यागबुद्ध्या - త్యాగబుద్ధితో
त्वग्वस्त्रधारी - చర్మాన్ని బట్టలుగా ధరించువాడు
त्रिनेत्रधारी - మూడుకళ్ళుగలవాడు
त्रस्तः - దుఃఖపడువాడు

**द**

दग्ध्वा - కాల్చి
दन्तैर्हीनः - దంతాలు లేనివాడు
दहनसंस्कारः - అంత్యక్రియ
दातव्यम् - ఇవ్వదగినది
दिग्जयम् - దిక్కుల గెలుపును
दिदृक्षुः - చూడాలనే కోరిక

SCERT TELANGANA

दीनालापम् - జాలి కలిగించు మాటలు
दीपम् - దీపమును
देशभावनया - దేశభావనతో
देशान्तरम् - మరో దేశానికి
दृढनिश्चयः - గట్టి నిశ్చయం కలవాడు
दृष्ट्वा - చూసి
द्रवाहारः - ద్రవరూపమైన ఆహారము
द्रुमः - చెట్టు

**ध**

ध्येयम् - నిశ్చయించుకున్న సంకల్పం
ध्रुवम् - నిశ్చయంగా

**न**

नयनम् - కన్ను
नारिकेलम् - టెంకాయ
निक्षिप्य - ఉంచి
निर्गच्छद्भिः - వెలువడుచున్నవాటిచే
निर्गत्य - వెళ్ళి
निर्जीवः - జీవం లేనివాడు/లేనిది
नितराम् - మిక్కిలి
निर्ममः - మమకారం లేనివాడు
निर्मातव्यम् - నిర్మించబడాలి
निरहङ्कारः - అహంకారం/పొగరు/ గర్వం లేనివాడు
निवेद्य - నివేదించి
निःशुल्कविद्याम् - రుసుము లేని విద్యను
निस्स्पृहः - కోరిక/ఆసక్తి లేనివాడు
निस्स्वार्थम् - స్వార్థరహితంగా
न्यूनता - లోపము

**प**

पक्षाभ्याम् (द्वि) - రెక్కలతో
पक्षिराजः - గరుడుడు
पञ्चशकारयुक्ताः - ఐదు'శ'కారాలతో కూడినవి
पठितवान् - చదివాడు
पर्णशाला - గుడిసె
पराजितवान् - ఓడించెను
परिश्रान्तः - అలసినవాడు
पवित्रीकरणे - శుద్ధిచేయుటలో
पवित्रपुष्पा - పవిత్రమైన పువ్వులు కలది
पादरक्षा - చెప్పు
पाथेयार्थम् - దారిలో భోజనానికై
पालकैः - పరిపాలకులచే
पुण्यम् - పుణ్యం
पुरतः - ముందు
पुरीम् - నగరాన్ని
पुरस्कारः - బహుమతి
पूजयित्वा - పూజించి
पूरयित्वा - పూరించి/నింపి
पेयजलम् - త్రాగే నీరు/మంచినీరు
प्रकल्पितम् - కల్పించబడినది
प्रतिदिनम् - ప్రతిరోజు
प्रतिनिवृत्तौ (द्वि) - తిరిగివెళ్ళిరి
प्रतिवर्षम् - ప్రతిసంవత్సరం
प्रदक्षिणम् - ప్రదక్షిణం
प्रभूतम् - ఎక్కువ
प्रमाणितम् - నిర్ధారితమైనది/ నిశ్చయింపబడినది
प्रयतितवती - ప్రయత్నించింది
प्रविश्य - ప్రవేశించి

SCERT TELANGANA

**प्रशंस्य** - పొగిడి
**प्रस्थितः** - బయలుదేరినవాడు
**प्रस्थापयामास** - పంపించెను
**प्रसन्नः** - సంతుష్టుడు
**प्राक्** - తూర్పు
**प्राङ्गणेषु** - పరిసరాలలో
**प्राप्य** - పొంది

**फ**

**फलान्वितम्** - సఫలమైనది/ ఫలవంతమైనది
**फेनिलम्** - కుంకుడుకాయ

**ब**

**बहुकष्टेन** - అతికష్టంతో
**बहुदिनेभ्यः** - చాలారోజుల నుండి
**बहुधा** - అన్నివిధాలా
**बहुभाषकः** - ఎక్కువగా మాట్లాడేవాడు
**बुद्धिमती** - బుద్ధిమంతురాలు

**भ**

**भगवता** - భగవంతునిచే
**भगवद्गीता** - భగవంతునిచే గానం చేయబడినది
**भगवद्गीतायाम्** - భగవద్గీతలో
**भक्तिमान्** - భక్తిపరుడు
**भारतीयाः** - భారతీయులు
**भारवाहनमितम्** - మోయగలిగినంత
**भूतघ्नी** - దుష్టశక్తిని తొలగించేది
**भ्रष्टाचारी** - చెడ్డ అలవాట్లు కలవాడు
**भ्रमन्** - తిరుగుతూ

**म**

**मधूकम्** - ఇప్పపూవు
**मनोहरम्** - అందమైన/మనోహరమైన
**मय्यर्पितमनोबुद्धिः** - నాకర్పించిన మనస్సు, బుద్ధి గలవాడు
**मशकाः** - దోమలు
**मस्तिष्कम्** - మెదడు
**महात्मानम्** - మహాత్ములకు
**महाबुद्धिमान्** - చాలా బుద్ధిమంతుడు
**महाराजसभायाम्** - మహారాజుగారి సభలో
**मह्यम्** - నా కొరకు
**मार्गपार्श्वयोः** - మార్గమునకు ఇరువైపులా
**मार्गस्थः** - దారిలో ఉన్నవాడు
**मानावमानयोः** - గౌరవం, అవమానం ఈ రెండింటికీ
**मिलित्वा** - కలిసి
**मिश्रितम्** - కలుపబడినది
**मुख्यभूमिकाम्** - ముఖ్యపాత్రను
**मूलम्** - వేరును
**मे** - నాకు
**मेघः** - మబ్బు

**य**

**यच्छन्** - ఇచ్చుచూ
**यदि** - ఒక వేళ
**यथार्थम्** - నిజం
**यथाविधि** - అనుకున్నవిధంగా
**योग्यं स्थानम्** - తగిన స్థానమును

**र**

**रक्षितवती** - కాపాడింది
**राजसः** - రజోగుణం గలవాడు
**राष्ट्रियपुरस्कारः** - జాతీయపురస్కారం
**रिक्तभाण्डम्** - ఖాళీపాత్ర
**रोगनिरोधकशक्तिः** - రోగం రాకుండా ఆపే శక్తి

SCERT TELANGANA

**ल**

लङ्काम् - లంకను
लवणार्णवम् - ఉప్పునీటి సముద్రమును
लक्ष्यमेव - లక్ష్యమే
लोकसेवनम् - ప్రజాసేవ/ లోకానికి చేయు సేవ

**व**

वक्तृत्वस्पर्धा - ఉపన్యాస పోటీ
वचनानुसारम् - మాటను బట్టి
वञ्चयित्वा - మోసగించి
वटवृक्षः - మర్రి చెట్టు
वार्ताहरः - విలేఖరి
वानरर्षभ! - ఓ వానరశ్రేష్ఠుడా!
वने - అరణ్యంలో
वरप्रदम् - వరమిచ్చునది
वस्तुविनिमयेन - వస్తుమార్పిడిచే
वस्त्रप्रक्षालनार्थम् - బట్టలు ఉతుకుటకు
विगतकल्मषम् - పోయిన మాలిన్యం కలవానిని/కలదానిని
विचित्रप्रश्नस्य - వింతప్రశ్నకు
विचित्रस्वभावा - వింతస్వభావము కలది
वित्तम् - ధనము/ధనమును
विद्यानिलयम् - చదువుకు నెలవును
विद्यास्वाम्यम् - విద్యాహక్కు
विद्याहीनः - చదువుకోనివాడు
विधातारम् - బ్రహ్మను
विनापि - లేకున్నను
विनोदार्थम् - వినోదం కొరకు
विपुलम् - విస్తృతమైన
विरलाः - తక్కువగా నున్నవి
विश्वपावनी - ప్రపంచాన్ని పవిత్రీకరించేది
विश्वज्ञानम् - ప్రపంచజ్ఞానం
विशुद्धया - స్వచ్ఛమైన మనసుతో
विस्मयः - ఆశ్చర్యం
व्रीडा - సిగ్గు
वृक्षाग्रम् - చెట్టు పైభాగము
वृक्षाग्रवासी - చెట్టుపై నివసించేది
वोढुम् - మోయుటకు
व्यायामशाला - వ్యాయామం చేయు ప్రదేశం

**श**

शतकिलोपरिमितम् - వందకిలోలు కలది
शतयोजनविस्तीर्णम् - వందయోజనాల వైశాల్యము కలది
शापग्रस्तः - శాపం పొందినవాడు
शिलाभक्षी - రాళ్ళను మింగునది
शुद्धीकरणम् - శుద్ధి చేయుట
शौचसाधनरूपेण - శుభ్రపరచుసాధనంగా
श्रमखिन्नानाम् - శ్రమించుటచే దుఃఖపడువారి యొక్క
श्रुत्वा - విని
श्रुतवती - విన్నది
श्रद्धया - శ్రద్ధతో

**स**

संरोप्य - చక్కగా నాటి
संस्थाप्य - స్థాపించి
संसेव्य - సేవించి
सङ्गणकम् - కంప్యూటర్ నుండి

SCERT TELANGANA

सङ्गविवर्जितः - ఎక్కువ అనుబంధం లేనివాడు

सङ्गृह्य - సంగ్రహించి

समताम् - సమత్వమును

समयस्फूर्त्या - సమయస్ఫూర్తితో

समवस्त्रम् - యూనిఫాం

सम्बोधनम् - పిలుచుట

सम्मानिताः - సన్మానింపబడినవారు

सम्माननम् - సత్కారము

समाराधनम् - ఆరాధించుట/ పూజించుట

समासाद्य - సమీపించి/చేరి

सर्वकारः - ప్రభుత్వం

सर्वरोगनिवारिणी - అనేక రోగాలను పోగొట్టునది

सत्वरं - త్వరగా

सम्पाद्य - సంపాదించి

सम्भाव्य - భావించి

सम्प्रहृष्टः - మిక్కిలి సంతోషించినవాడు

साधयामः - సాధిద్దాం

साक्षीभूत्वा - సాక్షిగా ఉండి

सार्थकम् - అర్థవంతమైనది

सात्त्विकः - సత్త్వగుణం కలవాడు

सार्वकालिकम् - ఎల్లకాలాలకు సంబంధించిన దానిని

साहाय्यम् - సహాయం

सिक्ता - తడుపబడినది

सिद्धयोगी - సిద్ధులు గల యోగి

सीमन्तिनीषु - స్త్రీలలో

सुखदुःखे - సుఖదుఃఖాలు

सुखप्रीतिविवर्धनाः - సుఖాన్ని ఇష్టాన్ని పెంచునవి

सुखमयम् - సుఖంతో నిండినది

सुहृदः - మిత్రుని యొక్క/ మంచివాని యొక్క

सुहृद्वृतः - మిత్రులతో కలిసి ఉన్నవాడు

सूर्यातपः - సూర్యుని వేడి/ఎండ

सेतुम् - వంతెనను

स्निग्धाः - స్వచ్ఛమైనవి

स्थिरमतिः - స్థిరమైన బుద్ధికలవాడు

स्वीकृत्य - స్వీకరించి

स्वल्पाघातैः - చిన్నగాయాలతో

स्वार्जितम् - సొంతంగా సంపాదించిన

स्वपराजयम् - తన ఓటమిని

स्वाम्यम् - హక్కు

स्वाम्यरक्षणम् - హక్కుని రక్షించుట

स्वास्थ्यसंरक्षणम् - ఆరోగ్యాన్ని కాపాడుకోవడం

स्वास्थ्यवृद्धिः - ఆరోగ్యాభివృద్ధి

**ह**

हत्वा - చంపి

हसित्वा - నవ్వి

हस्तलम्बनम् - చేయూత

हृदि - హృదయము నందు

★ ★ ★

SCERT TELANGANA

# क्रियापदकोशः

**अ**

अकारयत् - చేయించెను
अर्चयति स्म - పూజించుచుండేవాడు
अर्चयाम - పూజిద్దాం
अदात् - ఇచ్చెను
अपतन् - పడిరి/పడినవి
अवोचत् - పలికెను

**आ**

आगच्छतु - రా!
आगच्छेत् - రావలసి ఉన్నాడు/ఉన్నది
आगच्छम् - వచ్చాను
आदिशत् - ఆదేశించెను
आनेष्यति - తెస్తాడు/తెస్తుంది
आनेष्यावः(द्वि)- తెచ్చుకుందాం (ఇద్దరు)
आरोपयाम - నాటుదాం
आस्ताम् (द्वि) - ఉండిరి (ఇద్దరు)

**उ**

उत्खनाम - ఏరివేద్దాం
उद्विजते - ఉద్వేగము పొందుచున్నాడు
उद्घोषयन्ति - ప్రకటిస్తున్నారు
उद्दीपयाम - ప్రోత్సహిద్దాం
उन्नयाम - పైకి తీసుకొని వద్దాం
उपविशतु - కూర్చో
उपलभ्यते - లభిస్తున్నది
उपागच्छत् - చేరవచ్చెను/చెంతకువచ్చెను
उपाविशत् - కూర్చొనెను

**क**

कथयतु - చెప్పుము
कल्पयति - కల్పిస్తున్నది
कुर्मः - చేస్తున్నాం
कुर्वन्ति - చేస్తున్నారు
क्षिपन्तु - విసిరి కొట్టండి
क्षोभयामास - అల్లకల్లోలం చేసెను

**ज**

जानन्तु - తెలుసుకోండి/ తెలుసుకోగలరు
जानीमः - తెలుసుకొంటున్నాం

**द**

ददर्श - చూసెను
ददातु - ఇవ్వు
दशन्ति - కాటువేస్తున్నవి
दर्शयति - చూపుచున్నది/చున్నాడు
दर्शयामास - చూపించెను
दृष्टा - చూడబడినది

**त**

तिष्ठ - ఉండు
तिष्ठतु - ఉండుము
त्यजतु - వదిలెయ్యి

**न**

निर्णेष्यन्ति - నిర్ణయించగలరు
निर्मातव्यम् - నిర్మించవలసినది
निरगच्छत् - వెళ్ళిపోయెను
निवारयति - నివారిస్తున్నది/నివారిస్తున్నాడు
निवेदयिष्यामि - విన్నవించుకోగలను/ తెలియజేయగలను
निर्वर्तयन्ति - నిర్వర్తిస్తున్నారు

SCERT TELANGANA

**म**

मिश्रयन्ति - కలుపుచున్నారు

**व**

वितरन्ति - పంచుచున్నారు

विदधाति - చేస్తున్నాడు

विवेश - ప్రవేశించెను

विन्दति - పొందుచున్నాడు/చున్నది

**न**

नीयते - తీసుకువెళ్ళబడుచున్నది

नेष्यामः - తీసుకువెళ్దాం

नेष्यावः(द्वि) - తీసుకొని వెళ్తాము (ఇద్దరు)

न्यवेदयत् - నివేదించెను

**प**

पर्यपीडयत् - మళ్ళీ మళ్ళీ పీడించెను

पश्यति - చూస్తున్నది/చూస్తున్నాడు

पातयाम - పడవేద్దాం

पातयामः - పడేస్తున్నాం

पुप्लुवे - దాటెను

पृच्छतु - అడుగు

प्रतिनिवृत्तौ(द्वि)- తిరిగివెళ్ళారు (ఇద్దరు)

प्रतिवसति स्म - నివసించుచుండెను

प्रददाति - ఇస్తున్నాడు/ఇస్తున్నది

प्रदीयन्ते - ఇవ్వబడుచున్నవి

प्रविशावः (द्वि) - ప్రవేశిస్తున్నాం (ఇద్దరం)

प्रस्थितः - ప్రయాణమై వెళ్ళిన

प्रयामः - వెళ్తున్నాం

प्रस्थापयामास - పంపించెను

प्रार्थयत् - ప్రార్థించెను

प्रापयति - పొందుచున్నది/చున్నాడు

प्राप्नुयामः - పొందుచున్నాం

प्राप्नुमः - పొందుతాం

प्राविशत् - ప్రవేశించెను

प्राप्नोत् - పొందెను

प्राप्नोति - పొందుచున్నాడు/చున్నది

प्रैषयत् - పంపించెను

**ब**

बभौ - ఉండెను

बुद्ध्यते - తోచుచున్నది

बोधयति - బోధిస్తున్నది/చున్నాడు

**भ**

भवतु - అగుగాక!

भवेत् - అగుగాక!

**म**

मर्दयामास - మర్దించి చంపెను

**य**

याचिष्यन्ते - అడుగగలరు

याम - వెళదాం

**ल**

लुनामि - త్రుంచుచున్నాడు/చున్నది

**श**

श्रावयति - వినిపిస్తున్నాను

शृणोतु - వినుము

**स**

संश्रुणु - చక్కగా విను

समर्पयाम - సమర్పిద్దాం

साधयाम - సాధిద్దాం

स्थापयाम - స్థాపిద్దాం

★ ★ ★

SCERT TELANGANA